लोहभस्म, ताम्रभस्म, शुद्ध हरताल, वंगभस्म, अभ्रकभस्म, कौड़ीभस्म, सोंठ, मिर्च, पीपल, हर्र, बहेड़ा, आमला, चीतामूल, वायविडंग, पांचों नमक, चव, पीपल, शंख भस्म, बच, हाऊबेर, कूठ, कचूर, पाठा, देवदारु, इलायची और विधारा; सब चीज़ें समान-भाग लेकर एकत्र घोटकर (१-१ माशेकी) गोलियां बना लें।

इन्हें शकर, शहद और घीके साथ मिलाकर सेवन करनेसे लाल, सफेद, पीला और काला दुस्साध्य प्रदर तथा कुक्षिशूल, कटिशूल, सर्वदोषज योनिशूल, मन्दाग्नि, अरुचि, पाण्डु, मूत्रकृच्छ्र, श्वास और खांसीका नाश होता तथा आयु, पुष्टि और बलवर्णकी वृद्धि होती है।

(४४४९) **प्रदरान्तको रसः**

(भै. र.; र. चं.; र. सा. सं.; र. र.; ध.; र. रा. सु. । प्रदरा.; रसें. चि. म. । अ. ९)

शुद्धसूतं तथा गन्धं शुद्धवङ्गकरूप्यकम् ।
खर्परञ्च वराटञ्च शाणमानं पृथक् पृथक् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तोलकत्रितयं चैव लौहचूर्णं क्षिपेत्सुधीः ।
कन्यानीरेण सम्मर्द्य दिनमेकं भिषग्वरः ॥
असाध्यं प्रदरं हन्ति भक्षणान्नात्र संशयः ॥

शुद्ध पारा, शुद्ध गन्धक, वंगभस्म, चांदी भस्म, खपरियाभस्म और कौड़ीभस्म ५-५ माशे तथा लोहभस्म ३॥। तोले लेकर प्रथम पारे गन्धक की कज्जली बनावें और फिर उसमें अन्य औषधें मिलाकर सबको १ दिन ग्वारपाठा (घीकुमार) के रसमें घोटकर (३-३ रत्तीकी) गोलियां बना लें ;

इनके सेवनसे असाध्य प्रदर भी निस्सन्देह नष्ट हो जाता है ।

(४४५०) **प्रदरारिरसः** (प्रदररिपु).

(र. चं.; वैद्य र.; यो. र. । प्रदर.; वृ. यो. त. । त. १३५; वृ. नि. र. । स्त्रीरो.)

रसं गन्धं सीसं मृतमिति समं तैस्तु रसजं ।
समानं सर्वैः स्यात्तुलितमपि लोध्रं वृषरसैः ॥
दिनं पिष्टं नाम्ना प्रदररिपुरेपोऽपहरति ।
द्विवल्लः क्षौद्रेण प्रदरमतिदुःसाध्यमपि च ॥

शुद्ध पारा, शुद्ध गन्धक और सीसाभस्म १-१ भाग तथा रसौत ३ भाग और लोधका महीन चूर्ण ६ भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य ओषधियोंका चूर्ण मिलाकर सबको १ दिन बासा (अडूसा) के रसमें घोटकर ६-६ रत्तीकी गोलियां बनालें ।

इन्हें शहदके साथ सेवन करने से दुःसाध्य प्रदर भी नष्ट हो जाता है ।

(४४५१) **प्रदरारिलोहम्**

(भै. र.; धन्व. । स्त्रीरो.)

वत्सकस्य तुलां सम्यग्जलद्रोणे विपाचयेत् ।
अष्टभागावशिष्टन्तु कषायमवतारयेत् ॥
वस्त्रपूते घनीभूते द्रव्याणीमानि दापयेत् ।
समङ्गां शाल्मलं पाठां बिल्वं मुस्तञ्च धातकीम्।
अरुणां व्योमकं लौहं प्रत्येकन्तु पलंपलम् ।
माषद्वयं प्रयुञ्जीत कुशमूलपयो ह्यनु ॥
श्वेतं रक्तं तथा नीलं पीतं प्रदरं दुस्तरम् ।
कुक्षिशूलं कटिशूलं देहशूलञ्च सर्वगम् ॥
प्रदरारिरयं लौहो हन्ति रोगान् सुदुस्तरान् ।
आयुःपुष्टिकरश्चैव बलवर्णाग्निवर्द्धनः ॥

६। सेर कुड़ेकी छालको ३२ सेर पानीमें पकावें और ४ सेर पानी शेष रहने पर छानकर उसे पुनः पकाकर गाढ़ा करें और फिर उसमें मजीठ, मोचरस, पाठा, बेलगिरी, नागरमोथा, धायकेफूल और अतीसका चूर्ण तथा अभ्रकभस्म और लोहभस्म ५-५ तोले मिलाकर २-२ माशेकी गोलियां बनालें ।

इन्हें कुशाके काथके साथ सेवन करनेसे श्वेत लाल काला और पीला दुस्साध्य प्रदर, कुक्षिशूल, कटिशूल और शरीरकी पीड़ाका नाश होता तथा आयु, बल, वर्ण और अग्निकी वृद्धि होती है ।

प्रदीपनरसः

(र. सा. सं.)

" राजवल्लभरस " देखिये

(४४५२) **प्रभाकरवटी**

(भै. र. । हृद्रोगा.)

माक्षिकं लौहमभ्रञ्च तुगाक्षीरी शिलाजतु ।
क्षिप्त्वा खल्लोदरे पश्चाद् भावयेत् पार्थवारिणा॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुञ्जाद्वयमितां कुर्याद् वटीं छायाविशोषिताम् ।
प्रभाकरवटी सेयं हृद्रोगान् निखिलान् जयेत् ॥

स्वर्णमाक्षिक भस्म, लोहभस्म, अभ्रकभस्म, बंसलोचन और शिलाजीत समान भाग लेकर सबको एक दिन अर्जुनकी छाल के रसमें घोटकर २-२ रत्तीकी गोलियां बना कर छायामें सुखालें।

इसके सेवनसे हृद्रोग नष्ट होते हैं।

(४४५३) प्रभावतीगुटिका

(र. चि. म. । स्तब. ९)

यवचूर्णमितिलस्य्या वज्रीदुग्धेन संयुतम् ।
शुद्धजैपालसञ्चूर्णं त्रिभागमरिचान्वितम् ॥
विमर्द्य गुटिकाः कार्याष्टङ्कमात्राश्च शोषिताः ।
एकैव दीयते सार्कं शुभखण्डेन रेचने ॥
निहन्ति सोदरानष्टौ गुल्मप्लीहादिकान्गदान् ।
अचिरेणैव वेगेन नरं सारयते ध्रुवम् ॥
पातयेदामदोषञ्च पित्तरोगं भिनत्त्यसौ ।
पाषाणमपि दुर्भेद्यं भिनत्त्येष प्रभावती ॥

बारीक जौका आटा, थूहरका दूध और शुद्ध जमालगोटा १-१ भाग तथा कालीमिर्चका चूर्ण ३ भाग लेकर सबको एकत्र घोटकर १-१ टङ्क की गोलियां बनावें।

(व्यवहारिक मात्रा—३ रत्ती ।)

इनमेंसे १ गोली मिश्रीके साथ देनेसे शीघ्र ही वेगपूर्वक विरेचन होकर आम निकल जाती हैं और उदररोग, गुल्म, प्लीहा तथा पित्त रोगोंका नाश हो जाता है। यह गोलियां पत्थरके समान कठिन मलको भी तोड़कर निकाल देती हैं।

(४४५४) प्रभावतीगुटिका (वृकोदरीवटी)

(र. चं.; र. रा. सु.; र. र. स. । वातरो.)

मृतगंधकतीक्ष्णाभ्रैः सताप्यैः समभागिकैः ।
रसांशमपरं सर्वं षट्कोलं जीरकद्वयम् ॥
सौवर्चलं च सिन्धूत्थं विडङ्गं च हरीतकी ।
अम्लवेतसकं सर्वं बीजपूराम्लमर्दितम् ॥
गुटिकास्तेन कल्केन कार्याः कोलास्थिमात्रिकाः
योगिन्या बहुघातिनामयुतया त्रैलोक्यविख्याता ॥
निर्दिष्टा हि वृकोदरीति गुटिका सोष्णाम्बुना सेविताः ।
निःशेषानिलदोषरोगजरुजः श्लेष्मामरोगोद्भवम् ॥
मन्दाग्निं ग्रहणीं चतुर्विधमहाजीर्णं च तूर्णं जयेत् ॥

शुद्ध पारा, शुद्ध गन्धक, तीक्ष्णलोहभस्म, अभ्रकभस्म और सोनामक्खीभस्म तथा पीपल, पीपलामूल, चव, चीता, सोंठ, कालीमिर्च, दोनों जीरे, सञ्चल (काला नमक), सेंधा नमक, बायबिडंग, हर्र और अम्लवेतका चूर्ण समान भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य ओषधियोंका चूर्ण मिलाकर सबको बिजौरेके रसमें घोटकर बेर के बराबर गोलियां बनाकर सुखालें।

इन्हें गरम पानीके साथ सेवन करनेसे समस्त वातजरोग, कफजरोग, आमविकार, मन्दाग्नि, ग्रहणी और अजीर्णका नाश होता है।

(४४५५) प्रमदानन्दो रसः (१)

(आ. वे. वि. । जरायु. अ. ७९)

अयो रौप्यं तथा हेम रसं गन्धं शिलाजतु ।
वह्निद्रवेण सम्मर्द्य रक्तिमाना वटीश्चरेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाम्नासौ प्रमदानन्दो रसो ह्याशु विनाशयेत् ।
त्रिफलातोययोगेन सर्व्वाञ्जरायुजान् गदान् ॥
जरायुरोगिणी नारी न च सेवेत पूरुषम् ।
न खादेदुग्रवीर्य्याणि नापि कुर्य्यादतिश्रमम् ॥

लोहभस्म, चांदीभस्म, स्वर्णभस्म, शुद्ध पारा, शुद्ध गन्धक और शिलाजीत समान भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य औषधें मिलाकर सबको चीतेके क्वाथमें घोटकर १-१ रत्तीकी गोलियां बना लें ।

इन्हें त्रिफलाके क्वाथके साथ देनेसे स्त्रियोंके समस्त जरायुरोग नष्ट हो जाते हैं ।

जरायु रोगसे पीड़ित स्त्रीको पुरुषसमागम, उग्रवीर्य पदार्थ और अति परिश्रमसे बचना चाहिये ।

(४४५६) प्रमदानन्दो रसः (२)

(वृ. यो. त. । त. १४७)

कणाजातिजं हिङ्गुलं टङ्कणं च
वराटं विषं हेमवीजं च विश्वम् ।
भृशं मर्दयेन्निम्बुनीरेण यामं
तथा धूर्ततोयेन भृङ्गीरसेन ॥
अश्मे च मेहे विकारे ग्रहण्यां
कफे वातशूले सतौ खण्डमेहे ।
प्रशस्तः सितासेवितः शुक्रकारी
रसः सर्वदाऽऽनन्दनाम्ना प्रसिद्धः ॥
चपलानवयौवनभिभ्रमदा
प्रमदाशतदर्पहरः सहसा ।
कथितो भृगुणा मुनिना शतशो
ऽनुमितो रसिके रसराजपरः ॥

पीपल, जायफल, शुद्ध हिंगुल (शंगरफ), सुहागेकी खील, कौड़ीभस्म, शुद्ध बछनाग, शुद्ध धतूरेके बीज और सोंठका महीन चूर्ण लेकर सबको एकत्र मिलाकर १-१ पहर नीबू, धतूरा और भंगरेके रसमें घोटकर सुखाकर चूर्ण करके रक्खें ।

इसे मिश्रीके साथ सेवन करनेसे भयङ्कर प्रमेह, ग्रहणी, कफ, वातशूल और मधुमेहका नाश होता तथा वीर्य और कामशक्तिकी वृद्धि होती है ।

(४४५७) प्रमदेभाङ्कुशरसः

(वृ. यो. त. । त. १४७)

विशुद्धो रसो मासमुन्मत्ततैले
दशाहानि तैले तथोपर्बुधेषु ।
निपाच्योऽहर्निशं तत्र तैलं
पलं जीर्यते तत्समो गन्धनाम्ना ॥
कृतां कज्जलिं तां विनिक्षिप्य कूप्यां
मृदुस्वर्णपत्राणि सूताष्टमांशात् ।
ततो भस्मसादर्कयामं विधाय
स्वशीतं समादाय सिन्दूरकल्पम् ॥
त्र्यहं खाखसत्वक्कषायैर्विमर्द्य
त्र्यहं वैजयौजातिसारैर्दिनैकम् ।
तथा कोकिलाक्षस्य घर्म्मे कषायै-
र्विदार्याथ भूमौ क्षिपेद्गोलकं तम् ॥
मृदा द्व्यङ्गुलोन्मानयाच्छाद्य पश्चा-
दरण्योपलद्वन्द्ववह्निं विधाय ।
सुशीतं मृदुस्वेदमाप्तं रसेन्द्रं
गृहीत्वा ततो भागमाने वदामः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रसाद्भपोमनैकान्तजातीमभूनं
लवङ्गं द्विभागं त्रिभागं भुजङ्गम् ।
सितं कान्तभस्म विषं केसराख्यं
त्रिजातं तथा बङ्गभस्म समस्तम् ॥
अहेःफेनतापीजयोरर्धभागं
विमर्द्याथ यामं मरुद्भूमसूनैः ।
विदारीवरावासकैर्नागवल्ली
बलाशाल्मलीमर्कटीमूलजातैः ॥
पयोभिश्च गोधाङ्घ्रिरम्भासमुत्थैः
शताह्वासहादीप्यमुण्डीसमुत्थैः ।
महापत्रिकायष्टिहस्तिद्रवैश्च
विभाव्यं चिवारं ततो गोलमस्य ॥
दिनं स्वेदयेत्वास्वसत्वक्कषाये-
निबध्याम्बरे दोलिकायन्त्रमध्ये ।
अकूपारशोषस्य तैलेन भाव्यो
द्विवारं तथा स्वर्णबीजस्य तैलैः ॥
तथा वैजयैर्जातिसारस्य तैलै-
र्द्विवारं विभाव्योऽथ गोलं निबध्य ।
ततो मृत्पटैस्त्रिर्धराधारयन्त्रे-
पचेत्पूर्ववत्स्वाङ्गशीतं ततस्त्रिः ॥
उशीरेण भाव्यः सुगन्धेन तद्व-
त्तथाजोङ्गकेनाथ कस्तूरिकाद्भिः ।
विभाव्य शिवद्विट्कुचाद्भिः शिफाली-
द्रवैः शातपत्रोद्भवैः सिद्ध एषः ॥
तमेनं स्वतूर्यांशकर्पूरयुक्तं
निषेवेत वल्लद्वयं वाऽस्य मात्रा ।
लवङ्गं सितापुष्पसारोऽनुपानं
हितं क्षीरपानं विवर्ज्योऽम्लवर्गः ॥

पठित्वा च पञ्चाक्षरं मन्त्रराजं
कुमारीश्च यन्त्राणि च पूजयित्वा ।
निषेवेत पूर्वोक्तरीत्या रसेन्द्रं
निषेवेद्रसैः कामिनीसङ्गमं च ॥
त्रिदोषघ्न एषोऽबलागर्वहारी
वशीकार्यकारी महास्तम्भकारी ।
सदा ध्वजोत्थानकारी नराणां
तथा पातकारी न चार्वाङ्ग च कारी ॥
यश्चैकरात्रादपि नूत्नयोषा-
सङ्गाच्च्युतं वीर्यबलाद्विरिच्यते ।
तथाऽपि तुल्यो द्रवकाल्ययुक्ते-
स्तेजोबलं नैव जहाति किञ्चित् ॥
रसमेनं सेवयित्वा न सेवेत स्त्रियं यदि ।
निर्गच्छेन्नेत्रयोर्वीर्यं नेत्रनाशस्तदा भवेत् ॥
नाङ्गं शैथिल्यभावं व्रजति न च कटि-
स्त्रुट्यते तस्य कान्ति-
र्हेमाभा जायतेऽष्टादशविधमतुलं
नाशमेति प्रमेहम् ।
नष्टे वीर्ये प्रपन्नं प्रभवति यदि पुमान्
सेवते रम्यकान्तां,
षण्ढो वा वाजितुल्यो जनयति च महा
वाजितुल्यांश्च पुत्रान् ॥
एनं रसं च प्रमदा निषेवेत्
कुमारितुल्याऽऽक्षवयाऽपि सा स्यात्
एतद्रसास्वादनतः पुमांस्तां
युवाऽपि यातुं न समर्थ एव ॥
गर्भाशयगतान्दोषान्हन्ति वातकफोद्भवान् ।
प्रमदेभाङ्कुशो नाम रसराजः सुनिर्द्दिष्टः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुद्ध पारेको १ मास तक रातदिन निरन्तर धतूरेके तैलमें और १० दिन लाल चीतेके तैलमें पकावें। अग्नि इतनी होनी चाहिये कि जिससे १ दिन रातमें ५ तोले तेल जल जाय। तत्पश्चात् उस शुद्ध पारे में उसका आठवां भाग सोनेके वर्क मिलाकर इतना घोटें कि वर्क पारेमें मिल जायं। फिर उसमें पारेके बराबर गन्धक मिलाकर कज्जली बनावें और उसे आतशी शीशीमें डालकर मकरध्वज बनानेकी विधिके अनुसार १२ पहर बालुका यन्त्रमें पकावें। एवं बालुके बिल्कुल शीतल हो जाने पर उसमें से शीशीको निकालकर उसे सावधानी पूर्वक तोड़कर उसमें से सिन्दूरके समान लाल रंगके रसको निकाल लें।

इसे पीसकर ३ दिन पोस्तके डोडेके काथमें, ३ दिन भांगके बीजोंके तेलमें और १ दिन जायफलके तेलमें एवं १-१ दिन ताल मखाने और बिदारी कन्दके रसमें घोटकर गोला बनावें और उसे अरण्ड आदिके पत्तों में लपेटकर भूमिमें गढ़ा खोदकर उसमें रख दें तथा गोलेपर २ अंगुल मिट्टी चढ़ा दें। और फिर उस पर २ अरने उपले रखकर उनमें आग लगा दें।

तदनन्तर उसके स्वांग शीतल होने पर उसे निकाल कर पीस लें और उसमें अभ्रकभस्म, वैक्रान्तभस्म, जावित्री और लौंग २-२ भाग, सीसाभस्म ३ भाग, चांदीभस्म, कान्तलोहभस्म, शुद्ध बछनाग, केसर, दालचीनी, इलायची, तेजपात, बंगभस्म, अफीम और स्वर्णमाक्षिक भस्म आधा आधा भाग मिलाकर सबको १ पहर शंखपुष्पीके रसमें और ३-३ दिन विदारीकन्द, त्रिफला, वासा, पान, बला (खरैटी), सैंभलकी मूसली, कौंचकी जड़, गोदुग्ध, लज्जालु, केलेकी जड़, सौंफ, घृतकुमारी, अजमोद, गोरखमुण्डी, नागबला, मुलैठी और हाथीके मदमें घोटकर गोला बनावें। और उसे कपड़ेमें बांधकर दोलायन्त्र विधिसे १ दिन पोस्तके डोडेके काथमें पकावें। तदनन्तर उसे २-२ दिन समुद्रशोषके तेल, धतूरेके बीजोंके तैल, गांजेके बीजोंके तैल और जायफलके तैलमें घोटकर गोला बनावें और उसपर तीन कपर मिट्टी करके पहिलेकी भांति ही गढ़ेमें रखकर २ उपलोंकी अग्निमें स्वेदित करें। और फिर स्वांग शीतल होने पर निकालकर उसे खस, त्रिसुगन्ध, (दालचीनी, इलायची, तेजपात), अगर, कस्तूरी, केतकी, हारसिंहार और कमलके स्वरस या काथमें ३-३ दिन घोटकर सुरक्षित रक्खें।

इसमें से ६ रत्ती औषधमें १॥ रत्ती कपूर और १॥ रत्ती लौंगका चूर्ण मिलाकर मिश्री और शहदके साथ खाकर ऊपरसे दूध पीना चाहिये।

इसके सेवन कालमें दूध अधिक पीना और अम्ल पदार्थोंसे परहेज करना चाहिये।

यह रस त्रिदोष नाशक, कामिनी मदभञ्जक, वशीकरण, अत्यन्त स्तम्भक, नपुंसकता नाशक और वाजीकरण है।

इसे सेवन करने वाले पुरुष, स्त्रीसमागम करने पर भी बलहीन नहीं होते।

इसे सेवन करनेवाला पुरुष यदि स्त्रीसमागम नहीं करता तो उसके नेत्र बिगड़ जाते हैं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इसे सेवन करनेसे न तो कभी अङ्गों में शिथिलता आती है और न कमर टूटती है। तथा शरीरकी कान्ति स्वर्णके समान दीप्तिमान हो जाती है। इसके अतिरिक्त यह रस समस्त प्रमेहोंको भी नष्ट करता है।

यदि इसे नपुंसक मनुष्य भी सेवन करे तो वह भी अत्यन्त बलशाली सन्तान उत्पन्न करने में समर्थ हो जाता है।

यदि इसे वृद्धा स्त्री सेवन करे तो वह भी युवतीके समान हो जाती है।

इसके अतिरिक्त यह रस गर्भाशयके वातज और कफज रोगोंको भी नष्ट करता है।

(४४५८) **प्रमेहकुठारो रसः**

(यो. त. । त. ५१; र. रा. सु. । प्रमेह.; वृ. यो. त. । त. १०३)

चन्द्रकलावटी सं. १८८६ देखिये।

(४४५९) **प्रमेहकुञ्जरकेसरीरसः**

(र. चं. । प्रमेहा.)

रसगन्धायसाभ्राणि नागवङ्गौ सुवर्णकम् ।
वज्रकं मौक्तिकं सर्वमेकीकृत्य विचूर्णयेत् ॥
शतावरीरसेनैव गोलकं शुष्कमातपे ।
बुद्ध्वा शुष्कं समुद्धृत्य शरावे मुद्रवे क्षिपेत् ॥
सन्धिलेपं मृदा कुर्याद्गर्ते च गोमयाग्निना ।
पुटेद्यामचतुःसङ्ख्यमुद्धृत्य स्वांगशीतलम् ॥
श्लक्ष्णं खल्वे विनिक्षिप्य गोलं तं मर्दयेद् दृढम् ।
देवब्राह्मणपूजाञ्च कृत्वा धृत्वाऽथ कूपिके ॥
खादेद्रक्तिद्वयं प्रातः शीतं चानु पिबेज्जलम् ।
अष्टादशप्रमेहांश्च जयेन्मासोपयोगतः ॥
तुष्टिं तेजो बलं वर्णं शुक्रवृद्धिमनुत्तमाम् ।
अग्नेर्बलं वितनुते मेहकुञ्जरकेसरी ॥
दिव्यं रसायनं श्रेष्ठं नात्र कार्या विचारणा ॥

शुद्ध पारा, शुद्ध गन्धक, लोहभस्म, अभ्रकभस्म, नाग (सीसा) भस्म, बंगभस्म, स्वर्णभस्म, हीराभस्म और मोतीभस्म समानभाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य औषधें मिलाकर सबको एक दिन शतावरके रसमें घोटकर गोला बना लें और उसे सुखाकर शरावसम्पुटमें बन्द करें एवं गढ़ेमें रखकर अरने उपलोंकी आगमें पकावें। उपले इतने डालने चाहियें कि अग्नि ४ पहर में शान्त हो जाय। तत्पश्चात् सम्पुटके स्वांग शीतल हो जाने पर उसमेंसे गोलेको निकाल कर खूब खरल करके शीशीमें भर लें।

इसमें से नित्य प्रति ६ रत्ती दवा शीतल जलके साथ १ मास तक सेवन करनेसे १८ प्रकारके प्रमेह नष्ट हो जाते हैं।

यह रस उत्साह, तेज, बल, वर्ण, शुक्र और अग्निकी वृद्धि करता है। तथा एक श्रेष्ठ रसायन है।

(व्यवहारिक मात्रा—१ रत्ती।)

(४४६०) **प्रमेहकुलान्तको रसः**

(मेहकुलान्तकः)

(र. र.; र. का. धे. । प्रमेहा.)

सूतं वङ्गं मृतं तुल्यं मृताभ्रं सूतकान्त्रिधा ।
लशुनं सर्वतुल्यांशं सर्वमेकत्र पेषयेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**बदराभां वटीं कुर्यात् प्रमेहस्य कुलान्तकः ।
लशुनं छागमूत्रेण वसामेही पिबेदनु ॥**

पारदभस्म और बंगभस्म १-१ भाग तथा अभ्रकभस्म ३ भाग और ल्हसन ५ भाग लेकर प्रथम ल्हसनको पीसकर महीन लुगदी बनावें और फिर उसमें भस्में मिलाकर सबको अच्छी तरह घोटकर जंगली बेरके बराबर गोलियां बना लें।

इनमेंसे नित्यप्रति १ गोली खाकर ऊपरसे बकरीके मूत्रमें ल्हसन पीसकर पीनेसे वसामेह नष्ट होता है।

(४४६१) **प्रमेहकुलान्तको रसः** (२)

(मेहकुलान्तकः)

(भै. र.; धन्व. । प्रमेह.)

**मृतं वङ्गं मृतश्चाभ्रं शुद्धपारदगन्धकम् ।
भूनिम्बं पिप्पलीमूलं त्रिकटु त्रिफला त्रिवृत् ॥
रसाञ्जनं विडङ्गाब्दबिल्वगोक्षुरदाडिमम् ।
प्रत्येकं तोलकं ग्राह्यं शुद्धमश्मजतोः पलम् ॥
गोपालकर्कटीमूलस्वरसैर्वटिकां कुरु ।
प्रमेहान्विंशतिं हन्ति मूत्रकृच्छ्रं हलीमकम् ॥
अश्मरीं कामलां पाण्डुं मूत्राघातमरोचकम् ।
अनुपानं प्रयोक्तव्यं छागीदुग्धं पयोऽथवा ॥
धात्रीफलस्य निर्यासं क्वाथं कौलत्थजं पिबेत् ॥**

बंगभस्म, अभ्रकभस्म, शुद्ध पारद, शुद्ध गन्धक, चिरायता, पीपलामूल, सोंठ, मिर्च, पीपल, हर्र, बहेड़ा, आमला, निसोत, रसौत, बायबिड़ंग, नागरमोथा, बेलगिरी, गोखरु और अनारकी छाल १।-१। तोला तथा शुद्ध शिलाजीत ५ तोले लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य ओषधियोंका महीन चूर्ण मिलाकर सबको १ दिन गोपालकर्कटी (जंगली ककड़ी) के रसमें घोटकर (१-१ माशेकी) गोलियां बना लें।

इन्हें बकरीके दूध, पानी या आमलेके स्वरस अथवा कुलथीके काथके साथ सेवन करनेसे २० प्रकारके प्रमेह, मूत्रकृच्छ्र, हलीमक, अश्मरी, कामला, पाण्डु, मूत्राघात और अरुचिका नाश होता है।

(४४६२) **प्रमेहकेतूरसः** (प्रमेहसेतुः)

(र. चि. । अ. ९; र. चं; र. सा. सं; । र. का. धे.; र. रा. सु. । प्रमेह.)

**मृताभ्रं च वटक्षीरैर्मर्दयेत्प्रहरद्वयम् ।
विशोष्य पक्वं मूषायां सर्वरोगे प्रयोजयेत् ॥
विशेषान्मेहरोगेषु त्रिफलामधुसंयुतम् ।
युञ्जीत वल्लमेकं तु रसेन्द्रस्यास्य वैद्यराट् ॥**

पारदभस्म और अभ्रकभस्म बराबर बराबर लेकर दोनोंको २ पहर बड़के दूधमें घोटकर गोला बनावें और उसे मूषामें बन्द करके भूधरयन्त्रमें पकावें।

इसे ३ रत्तीकी मात्रानुसार सेवन करनेसे समस्त रोग और विशेषतः प्रमेह नष्ट होता है।

इसे खानेके बाद त्रिफलाका चूर्ण शहदमें मिलाकरचाटना चाहिये।

प्रमेहकेतुरसः

'हरिशङ्कररस' देखिये।

प्रमेहगजकेसरी रसः

(र. सा. स.; र. च.; र. रा. सु.; र. चि. । प्रमेह.)

मेहकेसरीरस देखिये।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रमेहगजसिंहो रसः

(र. र. । प्रमेह.)

" मेहद्विरदसिंहरस " देखिये ।

(४४६३) प्रमेहगजसिंहो रसः

(र. र. स. । अ. १७; र. रा. सु. । प्रमेह.)

चाण्डालीराक्षसीपुष्परसमध्वाज्यटङ्कणम् ।
रसं समांशोपरसं समं हेम्ना विमर्दितम् ॥
समांशं पूतिलोहं वा मूषायां विपचेत्क्रमात् ।
प्रमेहगजसिंहोयं रसः क्षौद्रैर्द्विमाषकम् ॥

शिवलिंगी और चोरकके फूलोंका रस, घी, शहद, सुहागा, शुद्ध पारा, और उपरस[१] समान भाग तथा सोनाभस्म या नाग अथवा वङ्गभस्म इन सबके बराबर लेकर सबको खरल करके एक गोला बनावें और उसे शराव सम्पुटमें बन्द करके १ दिन भूधरयन्त्रमें पकावें ।

इसमेंसे २ माशे दवा शहदके साथ सेवन करनेसे समस्त प्रकारके प्रमेह नष्ट होते हैं।

(व्यवहारिक मात्रा—१ रत्ती।)

(४४६४) प्रमेहबद्धरसः (प्रमेहवज्ररसः)

(शा. ध. । म. ख. अ. १२; र. र. स.; र. म.; र. का.; र. प्र. सु.; वृ. नि. र.; र. रा. सु. । प्रमेहा.; वृ. यो. त. । त. १०२)

भस्मसूतं मृतं कान्तं मुण्डभस्म शिलाजतु ।
शुद्धं ताप्यं शिला व्योषं त्रिफलाङ्कोलबीजकम् ॥
कपित्थं रजनीचूर्णं भृङ्गराजेन भावयेत् ।
विंशद्वारं विशोष्याथ मधुयुक्तं लिहेत्सदा ॥
निष्कमात्रं हरेन्मेहान्मेहबद्धरसो महान् ।
महानिम्बस्य बीजानि पिष्ट्वा षट्सम्मितानि च ॥
पलतन्दुलतोयेन घृतनिष्कद्वयेन च ।
एकीकृत्य पिबेच्चानु हन्ति मेहं चिरन्तनम् ॥

पारदभस्म, कान्तलोहभस्म, मुण्डलोहभस्म, शिलाजीत, सोनामक्खीभस्म, शुद्ध मनसिल, सोंठ, मिर्च, पीपल, हर्र, बहेड़ा, आमला, अङ्कोलके बीज कैथ और हल्दी समान-भाग लेकर प्रथम कूटने योग्य ओषधियोंको कूटकर चूर्ण बना लें फिर सब को एकत्र मिलाकर भंगरेके रसकी २० भावना देकर ४-४ माशेकी गोलियां बना लें।

इसे शहदके साथ खाकर ऊपरसे बकायनके ६ बीजोंको ५ तोले चावलोंके पानीके साथ पीस-कर उसमें ८ माशे घी मिलाकर पीनेसे समस्त प्रकारके प्रमेह नष्ट होते हैं।

(व्यवहारिक मात्रा—१ माशा)

नोट—र. र. स.; र. चि.; र. म. और धन्व-न्तरिमें इसे '**प्रमेहवज्र**' नामसे लिखा है। वृ. यो. त. में इसीको '**मेघनादरस**' नाम दिया गया है। वृ. यो. त. में मुण्डलोहकी जगह तीक्ष्ण लोह तथा गन्धक अधिक लिखा है।

रसमञ्जरीमें मुण्डभस्मकी जगह ताम्रभस्म लिखी है। रसेन्द्रसारसंग्रह आदि कई ग्रन्थोंमें अङ्कोलके बीजोंके स्थानमें वेल और जीरा लिखा है।

(४४६५) प्रमेहसिन्धुतारकरसः

(र. का. धे. । अ. २९)

रसो निष्काष्टादशको गन्धकस्य च विंशतिः ।
तालसत्वाच्च दशकौ तद्वत्सोमलस्य च ॥

१ उपरस—गन्धक, सोनागेरु, कसीस, फटकी, हरताल, मनसिल, सुरमा, मुर्दासिंग ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वङ्गस्य पट्ट षड्रसकाच्छीसकादथ चाभ्रकात्।
अर्कक्षीरेण सम्मर्द्य पुटेद्गजपुटेन च ॥
प्रिरष्टौ द्वादश तथा द्वात्रिंशत्प्रहरं पुनः।
वह्निस्त्रिधाऽर्कक्षीरेण भावयित्वा पुनः पुनः ॥
एवं पुटैस्त्रिभिः सिद्धः कपोतग्रीवसन्निभः।
मेहरोगहरोऽयं स्याद्रसो मेहाब्धितारकः ॥

शुद्ध पारा १८ निष्क, शुद्ध गन्धक २० निष्क, हरताल सत्व तथा शुद्ध सोमल १२-१२ निष्क तथा बंगभस्म, खपरियाभस्म, सीसाभस्म, और अभ्रकभस्म ६-६ निष्क लेकर सबको एकत्र घोटकर १ दिन आकके दूधमें खरल करके छोटी छोटी टिकिया बना लें और उन्हें सुखाकर शराव-सम्पुटमें बन्द करके गजपुटमें ३ पहरकी अग्नि दें अर्थात् गढ़ेमें इस अन्दाजसे उपले डालें कि ३ पहरमें अग्नि शान्त हो जाय। तदनन्तर पुटके स्वांग शीतल होनेपर उसमेंसे औषधको निकालकर पुनः आकके दूधमें घोटें और पहिलेकी भांति ही गजपुटमें ८ पहर आंच दें। एवं इसी प्रकार आक के दूधमें घोटकर तीसरी पुट १२ पहरकी और चौथी पुट ३२ पहरकी लगावें। इसके पश्चात् उसे पुनः आकके दूधमें घोट घोटकर तीन पुट और दें। इस प्रकार कुल सात पुट लगानेसे रस तैयार हो जायगा। उसका रंग कबूतरकी गर्दनके समान होगा।

इसके सेवनसे समस्त प्रमेह नष्ट होते हैं।

(मात्रा—१ रत्ती।)

प्रमेहसेतुरसः

'प्रमेहकेतुरस' तथा 'हरिशङ्कररस' देखिये।

(४४६६) प्रमेहहरो रसः

(र. का. धे. । अधि. २९)

रससौम्यशिला ताम्रं मर्दयेद्देदयामकम्।
कुमार्या च कदल्या च छिकाकूष्माण्डजै रसैः ॥
तद्रसैरेव संस्वेद्य मर्दयेद्रजनीद्रवैः।
पुटेद्गजपुटेऽश्वत्थपलाशोदुम्बरेन्धनैः ॥
चिञ्चाक्षारान्तरेऽयं तु रसो मेहहरो भवेत् ॥

पारदभस्म, चांदीभस्म, शुद्ध मनसिल और ताम्रभस्म बराबर बराबर लेकर सबको चार पहर तक ग्वारपाठाके रसमें घोटकर १ दिन उसीके रसमें दोलायन्त्र विधिसे पकावें तत्पश्चात् उसे इसी प्रकार केलेकी जड़, नकछिकनी और पेठेके स्वरसमें पृथक् पृथक् ४-४ पहर घोटकर इन्हींके रसोंमें ४-४ पहर स्वेदित करें और अन्तमें हल्दीके रस में घोटकर यथाविधि शरावसम्पुटमें बन्द करके गजपुटमें पलाश, पीपल, या गूलरकी लकड़ियोंकी आगमें फूंक दें। औषधको सम्पुटमें बन्द करते समय ऊपर नीचे इमलीका क्षार रखना चाहिये।

इसके सेवनसे प्रमेह नष्ट होता है।

(मात्रा—१ रत्ती।)

(४४६७) प्रमेहाङ्कुशरसः

(र. प्र. सु. । अ. ८; र. चं. । प्रमेह.)

हेमबीजविषवङ्गसूतकं
गन्धिबसाऽप्यथ चाभ्रभस्मकम्।
नागवल्लिजरसेन मर्दितं
कामदं सकलमेहजित्तथा ॥

शुद्ध धतूरेके बीज, शुद्ध बछनाग, बंगभस्म, शुद्ध पारद, शुद्ध गन्धक और अभ्रकभस्म समान-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य औषधोंका महीन चूर्ण मिलाकर सबको १ दिन पानके रसमें घोटकर सुरक्षित रक्खें।

इसके सेवनसे प्रमेह नष्ट होता है।

(मात्रा—१-२ रत्ती।)

सूचना

जिन रसोंके नाम 'प्रमेह' शब्दसे प्रारम्भ होते हैं उनमेंसे जो रस यहां न मिलें उन्हें मकारादि रस प्रकरणमें देखना चाहिये वहां वे 'मेह' शब्दसे आरम्भ होने वाले रसोंमें मिलेंगे।

(४४६८) **प्रवालपञ्चामृतरसः**

(वृ. नि. र.; र. चं.; यो. र. । गुल्म.)

प्रवालमुक्ताफलशङ्खशुक्ति-
कपर्दिकानां च समांशभागम्।
प्रवालमत्र द्विगुणं प्रयोज्यं
सर्वैः समांशं रविदुग्धमेव ॥
एकीकृतं तत्खलु भाण्डमध्ये
क्षिप्त्वा मुखे बन्धनमत्र योज्यम्।
पुटं च दद्यादतिशीतले च
उद्धृत्य तद्भस्म क्षिपेत्करण्डे ॥
नित्यं द्विवारं प्रतिपाकयुक्तं
वल्लप्रमाणं हि नरेण सेव्यम्।
आनाहगुल्मोदरप्लीहकास
श्वासाग्निमांद्यान्कफमारुतोत्थान् ॥
अजीर्णमुद्गारहृदामयघ्नं
ग्रहण्यतीसारविकारनाशनम् ॥
मेहामयं मूत्ररोगं मूत्रकृच्छ्रं तथाऽश्मरीम्।
नाशयेन्नात्र सन्देहो सत्यं गुरुवचो यथा ॥
पथ्याश्रितं भोजनमादरेण
समाचरेन्निर्मलचित्तवृत्त्या।
प्रवालपञ्चामृतनामधेयो
योगोत्तमः सर्वगदापहारी ॥

प्रवाल (मूंगा) भस्म २ भाग, मोतीभस्म, शंखभस्म, शुक्ति (मोतीकी सीप) भस्म और कौड़ी भस्म १-१ भाग लेकर सबको एकत्र मिलाकर उसमें सबके बराबर आकका दूध डालकर एक दिन घोटें और फिर उसे यथाविधि शरावसम्पुटमें बन्द करके गजपुटमें फूंक दें एवं सम्पुटके स्वांग शीतल होनेपर उसमेंसे भस्मको निकालकर पीसकर सुरक्षित रक्खें।

इसमेंसे नित्य प्रति २ रत्ती भस्म प्रातः सायं खिलानेसे आनाह, उदररोग, गुल्म, प्लीहा, खांसी, श्वास, अग्निमांद्य, कफ और वातजरोग, अजीर्ण, डकारें आना, हृद्रोग, ग्रहणीविकार, अतिसार, प्रमेह, मूत्रदोष, मूत्रकृच्छ्र और अश्मरी आदि अनेक रोगोंका नाश होता है।

(४४६९) **प्रवालप्रयोगः** (१)

(भा. प्र. । हिक्का.)

प्रवालशङ्खत्रिफलाचूर्णं मधुघृतप्लुतम्।
पिप्पलीगैरिकञ्चेति लेहो हिक्कानिवारणः ॥

प्रवालभस्म, शंखभस्म, हर्र, बहेड़ा, आमला, पीपल और गेरूका चूर्ण समान-भाग लेकर सबको एकत्र मिलाकर रक्खें।

इसे घी और शहदके साथ मिलाकर चाटनेसे हिचकी नष्ट होती है।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(४४७०) प्रवालप्रयोगः (२)

(सु. सं. । उत्त. त. अ. ४४ पाण्डु चि.)

प्रवालमुक्ताञ्जनशङ्खचूर्ण
लिह्यात्तथाकाञ्चनगैरिकोत्थम् ॥

प्रवाल (मूंगा), मोती, सुरमा, शंख और गेरु का चूर्ण समान भाग लेकर सबको गुलाबजल आदिमें पीसकर पिट्ठी बनावें ।

इसके सेवनसे पाण्डु नष्ट होता है ।

(मात्रा-१ माशा)

(४४७१) प्रवालप्रयोगः (३)

(च. सं. । चि. अ. २६ त्रिमर्मीय.)

पिबेत्तथा तण्डुलधावनेन
प्रवालचूर्ण कफमूत्रकृच्छ्रे ।

प्रवाल (मूंगे) के चूर्णको चावलोंके पानी के साथ सेवन करनेसे कफज मूत्रकृच्छ्र नष्ट होता है ।

(मात्रा-१ माशा)

(४४७२) प्रवालमारणम् (१)

(र. सा. सं । पूर्वखण्ड)

क्षीरदुग्धेन प्रवालञ्च भावयित्वा तु हण्डिके ।
मध्येऽपि तक्रसहितं स्थापयेत्तां निरोधयेत् ॥
चुल्ल्यामग्निप्रतापेन म्रियते प्रहरद्वये ॥

मूंगेको स्त्रीके दूधमें घोटकर एक हाण्डीमें थोड़ासा तक्र डालकर उसमें रक्खें और उसका मुख बन्द करके उसे चूल्हे पर चढ़ाकर उसके नीचे २ पहर तक अग्नि जलावें तो मूंगेकी भस्म बन जायगी ।

(४४७३) प्रवालमारणम् (२)

(र. रा. सु. । पूर्वखण्ड)

मौक्तिकस्य विधिप्रोक्तः
प्रवालेऽपि तथा विधिः ।

मुक्ताभस्मकी विधिसे ही प्रवाल की भी भस्म बनती है ।

('मुक्ताभस्म विधि' मकारादि रसप्रकरणमें देखिये ।)

(४४७४) प्रवाललक्षणगुणाः

(आ. वे. प्र. । अ. १३; र. र. स.; र. चं.)

पक्वबिम्बीफलच्छायं वृत्तायतमवक्रकम् ।
स्निग्धमव्रणकं स्थूलं प्रवालं सप्तधा शुभम् ॥
पाण्डुरं धूसरं सूक्ष्मं सव्रणं कण्डरान्वितम् ।
निर्भारं शुभ्रवर्णञ्च प्रवालं नेष्यते सप्तधा ॥
प्रवालं मधुरं साम्लं कफपित्तादिदोषनुत् ।
वीर्यकान्तिकरं स्त्रीणां धृते मङ्गलदायकम् ॥
क्षयपित्तास्रकासघ्नं दीपनं पाचनं लघु ।
विषभूतादिशमनं विद्रुमं नेत्ररोगहृत् ॥

जिस मूंगेका रंग पकी कन्दूरीके समान चमकदार लाल हो, जो आकारमें गोल बड़ा और अवक्र (सीधा) तथा स्थूल हो एवं स्पर्श में चिकना हो और जिसमें व्रण न हों वह उत्तम होता है ।

जो मूंगा हल्का पीला, धुंधला या सफेद हो, जो बारीक और वजनमें हल्का हो तथा जिसमें छिद्र और रेखाएं हों वह मूंगा अच्छा नहीं माना जाता ।

मूंगा मधुर, किञ्चिदम्ल, कफपित्तनाशक,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वीर्य और कान्ति वर्धक, यदि स्त्रियां धारण करें तो उनके लिये मंगलकारी तथा क्षय, रक्तपित्त, खांसी, विष, मूत्रविकार और नेत्ररोगनाशक एवं दीपन और पाचन है ।

प्रवालशोधनम्

(मुक्ताशोधन देखिये ।)

प्राणत्राणरसः

(र. र. । राजयक्ष्मा.)

(' प्राणनाथरस ' सं. ४४७६ देखिये ।)

(४४७५) प्राणदापर्पटी

(वृ. यो. त. । त. ७६; वृ. नि. र.; यो. र.; र. चं. । क्षय.)

सूताभ्रायोहिवङ्गोषणविषमखिलां–
शेन गन्धेन लौहीं
कोलाग्नौ विद्रुतेन क्षणमथ मिलितं
ढालितं गोमयस्थे ।
रम्भापत्रेऽमुनाऽन्येन च दृढपिहितं
प्राणदा पर्पटीस्या–
त्पाण्डौ रेके ग्रहण्यां ज्वरारुचिकसने
यक्ष्ममेहाग्निमान्द्ये ॥
प्राणदा पर्पटी सैषा भाषिता शम्भुना स्वयम् ।
तत्तद्रोगानुपानेन सर्वरोगविनाशिनी ॥

शुद्ध पारद, अभ्रकभस्म, लोहभस्म, सीसा-भस्म, बंगभस्म तथा काली मिर्च और शुद्ध बछ-नाग का चूर्ण १–१ भाग तथा शुद्ध गन्धक ७ भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य औषधें मिलाकर सबको अच्छी तरह खरल करें । तदनन्तर एक लोहेकी कढ़ाईमें जरासा घी लगाकर उसमें इस कज्जलीको डालकर बेरीके कोयलोंकी मन्दाग्नि पर पिघलावें और फिर भूमि पर गायका गोबर फैलाकर उसपर केलेका पत्ता बिछावें एवं उसके ऊपर वह पिघली हुई कज्जली फैलाकर उसपर दूसरा पत्ता ढककर शीघ्रता पूर्वक गोबरसे दबा दें । थोड़ी देर बाद जब वह बिल्कुल शीतल हो जाय तो दोनों पत्तों के बीचमें से पर्पटीको निकाल लें ।

इसके सेवनसे पाण्डु, अतिसार, ग्रहणी, ज्वर, खांसी, यक्ष्मा, प्रमेह और अग्निमांद्यका नाश होता है । इसके अतिरिक्त उचित अनुपान के साथ देनेसे यह अन्य समस्त रोगोंको भी नष्ट करती है ।

(साधारण मात्रा—२ रत्ती । विशेष सेवन विधि ' पञ्चामृत पर्पटी ' में देखिये ।)

(४४७६) प्राणनाथरसः[1] (१)

(प्राणत्राणरसः)

(वृ. नि. र. । क्षय.; र. र.; र. का. धे. । क्षय.)

लोहभस्म पलैकन्तु द्विपलं भृङ्गजद्रवम् ।
वराभार्ङ्गीभवं द्रावं पलैकैकं नियोजयेत् ॥
पलैकं त्रैफले क्वाथे सर्वं भर्ज्यं च खर्परे ।
लोहांशं माक्षिकं शुद्धं मर्द्यं पूर्वोदितैर्द्रवैः ॥
रुद्ध्वा त्रिभिः पुटैः पाच्यं द्रवैर्मर्द्यं पुनः पुनः ।
मृतं सूतं मृतं वङ्गं निष्कं निष्कं विमिश्रयेत् ॥

१—रसरत्नाकर में इसे "प्राणत्राण" नाम दिया गया है । उसमें "वराभार्ङ्गी...नियोजयेत्" यह श्लोकार्ध नहीं है तथा बंग की जगह नाग लिखा है ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वौ निष्कौ शुद्धगन्धस्य चतुर्निष्का वराटिका ।
एकी कृत्य पुटे पाच्यं पूर्वलोहविमिश्रितम् ॥
पूर्वोक्तैस्तु द्रवैर्मर्द्य पुटेनैकेन पाचयेत् ।
चूर्णयेन्मरिचं सप्त तुल्यटङ्कणयोर्दश ॥
मेलयेच्च पृथक् निष्कं प्राणनाथाह्वयो रसः ।
भक्षयेन्निष्कपादार्द्धमसाध्यराजयक्ष्मनुत् ॥
शोफोदरार्शोग्रहणीज्वरगुल्महरं तथा ॥

५ तोले त्रिफलेका क्वाथ एक मिट्टीके शरावे में डालकर उसमें ५ तोले लोहभस्म डालकर मन्दाग्निपर सेकें । जब समस्त रस शुष्क हो जाय तो लोहभस्मको खरलमें डालकर उसमें ५ तोले शुद्ध सोनामक्खीका चूर्ण मिला कर सबको १० तोले भंगरेके रस और ५-५ तोले त्रिफले और भरंगीके रसमें घोटें । तदनन्तर उसका एक गोला बनाकर उसे शराव-सम्पुटमें बन्द करके गजपुट में फूंकें । इसी प्रकार उसे उक्त तीनों रसों में घोट घोट कर तीन पुट दें । तत्पश्चात् उसमें ५-५ माशे पारे और बंग की भस्म तथा १० माशे शुद्ध गन्धक और २० माशे कौड़ीभस्म मिला कर पूर्वोक्त तीनों रसों में घोटकर गजपुट में फूंक दें । जब पुट स्वांग शीतल हो जाय तो उसमें से औषधको निकाल कर उसमें ३५ माशे काली मिर्चका चूर्ण तथा ५० माशे तुत्थभस्म और इतना ही सुहागा मिलाकर अच्छी तरह घोट-कर रक्खें ।

इसके सेवनसे दुरसाध्य राजयक्ष्मा, शोथ, उदररोग, अर्श, ग्रहणी, ज्वर और गुल्मका नाश होता है ।

मात्रा—आधा माशा ।

(४४७७) प्राणनाथरसः (२)

(र. र. स. । उ. खं. अ. १४; र. चि. म. । स्तबक ११)

अयोरजो विंशतिनिष्कमानं
विभावितं भृङ्गरसाद्रकेन ।
धत्तूरभार्ङ्गी त्रिफलारसार्थं
तुल्यांशताप्यं विपचेत्पुटेषु ॥
सूतस्य निष्कं समभागतुत्थं
गन्धोपलौ द्वौ चतुरो वराटान् ।
पक्त्वा पुटाग्नौ समलोहचूर्णा-
त्पचेत्तथा पूर्वरसैर्विमिश्रान् ॥
चूर्णेऽस्मिन् मरिचाः सप्ततुल्यटङ्कणयोर्दश ।
संसृजेत्पृथङ्निष्कान्प्राणनाथाह्वयोदितः ॥
अर्धपादो रसाद्भक्ष्यो केवलाद्राजयक्ष्मिभिः ।
शोषोदरार्शोग्रहण्यीज्वरगुल्माद्युपद्रुतैः ॥

१००-१०० माशे शुद्ध लोह और सोना-मक्खीके चूर्णको ८ सेर भंगरे के रसमें थोड़ा थोड़ा रस डालते हुवे घोटें । तत्पश्चात् उसकी टिकिया बनाकर सुखाकर, शरावसम्पुटमें बन्द करके यथाविधि गजपुटमें फूंकें । इसी प्रकार उसे क्रमशः धतूरा, भारंगी और त्रिफलाके ४-४ सेर रसमें घोट कर एक एक पुट दें ।

तत्पश्चात् उसमें ५ माशे शुद्ध पारा, ५ माशे शुद्ध तूतिया, १० माशे शुद्ध गन्धक और २० माशे कौड़ीका चूर्ण मिलाकर सबको उपरोक्त रसोंमें खरल करके गजपुटमें फूंकें । और फिर उसमें ३५ माशे काली मिर्चका चूर्ण तथा ५०-५० माशे सुहागेकी खील और तुत्थभस्म मिलाकर घोटकर सुरक्षित रक्खें ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इसे ४ रत्तीकी मात्रानुसार सेवन करनेसे राजयक्ष्मा, शोष, उदररोग, अर्श, ग्रहणी, ज्वर और गुल्मादिका नाश होता है।

(४४७८) प्राणवल्लभो रसः [1]

(र. चं. । गुल्मा.; रसें. सा. सं. । ग्रीह.; रसें. चि. म. । अ. ९; र. चं. । गुल्मा.; रसें. सा. सं. । गुल्मा.; भै. र. । गुल्मा.)

लौहं ताम्रं वराटं च तुत्थं हिङ्गु फलत्रिकम् ।
स्नुहीमूलं यवक्षारं जैपालं टङ्कणं त्रिवृत् ॥
प्रत्येकं च पलं ग्राह्यं छागीदुग्धेन पेषितम् ।
चतुर्गुञ्जां वटीं खादेद्वारिणा मधुनाऽपि वा ॥
प्राणवल्लभनामायं गदनानन्दभाषितः ।
दोषं रोगं च संवीक्ष्य युक्तया वा त्रुटिवर्द्धनम् ॥
निहन्ति कामलां पाण्डुमानाहं श्लीपदार्बुदम् ।
गलगण्डं गण्डमालां व्रणानि च हलीमकम् ॥
अपचीं वातरक्तं च कण्डुविस्फोटकुष्ठकम् ।
नातः परतरः श्रेष्ठः कामलार्तिभयेष्वपि ॥

लोहभस्म, ताम्रभस्म, कौड़ीभस्म, तुत्थभस्म, भुनी हुई हींग, हर्र, बहेड़ा, आमला, सेंड (थूहर) की जड़, जवाखार, शुद्ध जमालगोटा, सुहागेकी खील और निसोत ५-५ तोले लेकर कूटने योग्य चीज़ोंको कूटकर चूर्ण बनावें और फिर सबको एकत्र मिलाकर १ दिन बकरीके दूधमें घोटकर ४-४ रत्तीकी गोलियां बना लें।

इन्हें पानी या शहदके साथ सेवन करनेसे कामला, पाण्डु, आनाह, श्लीपद, अर्बुद (रसौली), गलगण्ड, गण्डमाला, व्रण, हलीमक, अपची (गण्डमालाभेद), वातरक्त, खुजली, विस्फोटक और कुष्ठका नाश होता है।

कामला रोगके लिये इससे अच्छी अन्य एक भी औषध नहीं है।

इसकी मात्रामें रोगीके बलाबल का विचार करके न्यूनाधिकता भी कर सकते हैं।

(४४७९) प्राणिकल्पद्रुमगोलरसः

(आ. वे. प्र. । अ. १)

सूतं गन्धं कान्तपाषाणमिश्रं
ब्राह्मैर्बीजैर्मर्दयेदेकघस्रम् ।
गोलं कृत्वा टङ्कणेन प्रवेष्ट्य
पश्चान्मृत्स्नागोमयाभ्याम् धमेत्तम् ॥
शुष्के यन्त्रे सत्त्वपातप्रधाने
किट्टे सूतो बद्धतामेति नूनम् ।
बद्धं पश्चात्क्षारकाचप्रयोगा-
द्धेम्ना तुल्यं मूतमावर्तयेत्तु ॥
वक्त्रे खोटः स्थापितो वत्सरार्धं
रोगान् सर्वान् हन्ति सौख्यं करोति ।
यद्वा दुग्धे गोलकं पाचयित्वा
दद्याद्दुग्धं पिप्लीभिः क्षये तत् ॥
लौहे पात्रे पाचयित्वा तु देयं
शुष्के पाण्डौ कामले पित्तरोगे ।
वासे गोलं व्योषवातारितैले
पक्त्वा तैलं गन्धयुक्तं ददीत ॥
भार्गीमुण्डीकासमर्दाटरूष
द्रावैर्गोलं पाचयेच्छ्लेष्मनुत्त्यै ।

---

[1] रसेन्द्रसारसंग्रह, रसचण्डांशु तथा रसराजसुन्दर में यह रस पाण्डुरोगाधिकार में भी लिखा है। उसमें हिंगुलसे निकला हुआ पारा, गन्धक और केसर अधिक है।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कासे श्वासे तं च दद्यात्कषायं
माध्वीकाक्तं पिप्पलीचूर्णयुक्तम् ॥
यस्मिन् रोगे यः कषायोऽस्ति चोक्त-
स्तस्मिन् गोलं पाचयित्वा कषाये ।
दद्यात्तद्रोगनाशाय पथ्यं
तत्तद्रोगे कीर्तितं यत्तदेव ॥
उक्तो गोलः प्राणिकल्पद्रुमोऽयं
पूजां कृत्वा योजयेद्युक्तियोगात् ॥

शुद्ध पारा, शुद्ध गन्धक, कान्तपाषाण और पलाशके बीज समान भाग लेकर सबको एक दिन अच्छी तरह घोटकर पानीकी सहायतासे गोला बनावें और उस पर सुहागेका लेप करके सुखा लें। तत्पश्चात् उसपर मिट्टी और गोबर का लेप करके उसे सुखा कर सत्वपातन यन्त्रमें धमावें। इससे पारा अवश्य बद्ध हो जायगा। तदनन्तर उसे काचलवण और सुहागे के साथ पिघलाकर उसमें उसके बराबर स्वर्ण पत्र मिलाकर गोली बना लें।

इस गोलीको ६ मास तक मुंहमें रखनेसे समस्त रोग नष्ट होकर सौख्यकी वृद्धि होती है।

इसे दूधमें डालकर उसे गर्म करके उसमें पीपलका चूर्ण मिलाकर पीनेसे क्षयरोग नष्ट होता है।

लोहे के पात्रमें दूध डालकर उसमें यह गोली डालकर पकावें, इस दूधके पीनेसे शोथयुक्त पाण्डु, कामला और पित्तरोगोंका नाश होता है।

अरण्डीके तेलमें त्रिकुटेका चूर्ण और यह गोली डालकर थोड़ी देर तक पकावें। इस तेलमें गन्धक मिलाकर पिलानेसे वातव्याधि नष्ट होती है।

इस गोलीको भरंगी, गोरखमुण्डी, कसौंदी और अडूसे (बासे) के रसमें पकाकर पिलानेसे कफजरोग नष्ट होते हैं।

खांसी और श्वास में उपरोक्त भारंगी इत्यादि औषधोंके काथमें यह गोली डालकर थोड़ी देर पकाकर उसमें माध्वीक सुरा और पीपलका चूर्ण मिलाकर पीना चाहिये।

इसे जिस रोगमें देना हो उसीको नष्ट करने वाले किसी कषायके साथ पकाकर पिलाना और तद्रोगोचित पथ्य पालन करना चाहिये।

प्राणेश्वररसः (१) (सिद्धाय:)
(र. सा. सं.; र. चं.; भै. र.; र. का.; र. रा. सुं। ज्वरातिसा.)

'सिद्धप्राणेश्वररस' देखिये।

(४४८०) **प्राणेश्वररसः** (२) (लघु:)
(र. का. धे. । ज्वर.)

त्रिक्षारं ग्रन्थिकं त्र्यूषद्विजीरकयवानिकाः ।
तेजोवती धूर्तबीजलवङ्गाऽऽकरकराऽनलम् ॥
रसगन्धौ विषं शिग्रु निर्गुण्ड्यार्द्रकधूर्तजैः ।
विधाय भावना गुञ्जाद्वयं द्विगुणशर्करम् ॥
सद्योजलाऽनुपानेन रसः शीतज्वरापहः ।
लघुः प्राणेश्वरः सोऽयं रसो मुख्यो ज्वरे मतः ॥

सुहागा, जवाखार, सज्जीखार, पीपलामूल, सोंठ, मिर्च, पीपल, दोनों जीरे, अजवायन, तेजबल, धतूरेके बीज, लौंग, अकरकरा, चीता, पारा, गन्धक, बछनाग और सहंजने की छाल एक एक भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य औषधियोंका महीन चूर्ण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिलाकर सबको संभालें, अदरक और धतूरेके रसकी १—१ भावना देकर २—२ रत्तीकी गोलियां बनावें।

इनमें से १—१ गोली ४ रत्ती शक्करमें मिलाकर ताजे पानीके साथ देनेसे शीतज्वर नष्ट होता है।

(४४८१) **प्राणेश्वरो रसः** (३)

(सर्वाङ्गसुन्दररसः)

(र. र. स. । उ. अ. १८)

शुद्धमभ्रं रसं गन्धं मेलयित्वा समांशकम् ।
तालमूलीरसैर्मर्द्य कल्कं सम्पादयेच्छुभम् ॥
तत्कल्कं कूपिकामध्ये कृत्वा वक्त्रं निरुन्धयेत् ।
खटिन्या मुखमाच्छाद्य मृदा खर्परसंज्ञया ॥
कूपिकां लेपयेत्सर्वां शोषयेदातपे खरे ।
कूपिकां भूमिगर्तायां कृत्वा तां पुटयेत्ततः ॥
कूपिकां मर्दयेत्कृत्स्नां खटिन्या सह संयुताम् ।
त्रिभिः क्षारैस्तु तच्चूर्णं पञ्चभिर्लवणैस्तथा ॥
त्र्यूषणं त्रिफला हिङ्गु पुरमिन्द्रयवास्तथा ।
गुञ्जाकिनी तथा चित्रमजमोदा यवानिका ॥
एतानि समभागानि समादाय विचूर्णयेत् ।
योजयेत्सह सूतेन ततः सिद्ध्यति सूतकः ॥
सिद्धसूतस्य पर्णेन माषं सर्वरुजापहम् ।
भक्षयेत्प्रातरुत्थाय रसः सर्वाङ्गसुन्दरः ॥
उष्णोदकानुपानं तु पाययेच्चुलुकद्वयम् ।
भक्षयेदेकवारं तु द्विवारं न कथं च न ॥
दिनमध्ये वारमेकं दातव्यो भिषजा रसः ।
शीतोदकं सकृद्देयं तृड्भावेप्यहर्निशम् ॥
भोजने वर्जयेत्तत्र शाकाम्लं द्विदलं तथा ।
तैलाभ्यङ्गं ब्रह्मचर्यं वर्जयेच्छयनं दिवा ॥
हितं तत्सेवयेत्पथ्यमहितं च विवर्जयेत् ।
अनेनैव प्रकारेण योजयेत्प्रतिवासरम् ॥
यस्त्वचेतनतां याति सन्निपाती कथं च न ।
तस्य नातिप्रयोक्तव्यो रसो यत्नाद्भिषग्वरैः ॥
देवाग्निऋषिविप्रांश्च कुमारीयोगिनीगणान् ।
पूजयित्वा यथा शक्त्या सेव्यः प्राणेश्वरो रसः ॥
गुल्मं चाष्टविधं वातं शूलं च परिणामजम् ।
सन्निपातज्वरं चैव प्लीहानमपकर्षति ॥
कामलां पाण्डुरोगं च मन्दाग्निं ग्रहणीं तथा ।
शिववत्सेविता हन्ति रसः प्राणेश्वरस्त्वयम् ॥

शुद्ध पारद और गन्धक तथा अभ्रकभस्म १-१ भाग लेकर तीनोंको तालमूलीके रसमें घोटकर कल्क बनावें और उसे कपड़मिट्टी की हुई आतशी शीशीमें भरकर उसके मुखमें खिड़ियाका डाट लगाकर उस पर भी कपड़मिट्टी करके सुखा दें। इसके पश्चात् उस शीशीको गढ़ेमें रखकर भूधर-पुटमें पकावें और फिर स्वांग शीतल होनेपर उसमें से औषधको निकालकर पीस लें तथा सुहागा, सज्जीखार, जवाखार, पांचों नमक, सेंठ, मिर्च, पीपल, हर्र, बहेड़ा, आमला, भुनीहुई हींग, गूगल, इन्द्रजौ, भांग, चीता, अजमोद और अजवायनका चूर्ण समान भाग लेकर सबको एकत्र मिलावें और उपरोक्त रसमें उसके बराबर यह चूर्ण मिलाकर सुरक्षित रक्खें।

इसमें से १ माशा औषध पानमें रखकर खानेसे समस्त रोग नष्ट होते हैं।

इसे प्रातःकाल खाकर ऊपरसे दो एक चुल्लू

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उष्ण जल पीना चाहिये। इसे दिन भरमें केवल एक बार ही खिलाना चाहिये, दो बार भूलकर भी न देना चाहिये। यदि प्यास न लगे तो भी २४ घण्टेमें एक बार शीतल जल पिलाना चाहिये।

इसके सेवनकालमें शाक, खटाई और दाल न खानी चाहिये; दिनमें सोने से भी बचना चाहिये। शरीरपर तैलकी मालिश करनी और ब्रह्मचर्यव्रतका पालन करना चाहिये।

इसके सेवनसे आठ प्रकारके गुल्म, वायु, परिणाम शूल सन्निपात ज्वर, प्लीहा, कामला, पाण्डु, मन्दाग्नि और ग्रहणीरोगका नाश होता है।

यदि सन्निपातका रोगी अचेत हो तो उसे यह रस अधिक सेवन न कराना चाहिये।

नोट—र. र. समुच्चय के बारहवें अध्यायमें तथा र. का. धे.; र. रा. सु. ज्वराधिकारमें जो प्राणेश्वर रसका योग दिया है वह भी लगभग इसके समान ही है। उसमें पारदादि तीनों औषधोंको बाराहीकन्द के रसमें घोटकर वालुकायन्त्रमें पकानेको लिखा है तथा भांगका अभाव है और जीरेकी जगह अजमोद है एवं सुहागा इत्यादि प्रत्येक औषध पारेकी बराबर लिखी है। र. का. धे. और र. रा. सु. वाले प्रयोगमें अभ्रक के स्थानमें ताम्रभस्म है। तथा बाराहीकन्द और मूसली की भावना अधिक लिखी है। एवं सुहागा आदि सब मिलाकर कूपी-पक रसके बराबर लिखे हैं।

(४४८२) प्राणेश्वरोरसः (४)

(भै. र.; र. रा. सुं.; रसे. सा. सं.; । र. का. धे.। ज्वरा.; रस. मं. । अ. ६)

शुद्धं सूतं तथा गन्धं मृताभ्रं विषसंयुतम्।
सर्वं तन्मर्दयेत्तालमूलीनीरैस्त्र्यहं बुधः॥
पूरयेत्कूपिकान्ते च मुद्रयित्वा च शोषयेत्।
सप्तभिर्मृत्तिकावस्त्रैर्वेष्टयित्वा च शोषयेत्॥
पुटेत् कुण्डप्रमाणेन स्वाङ्गशीतं समुद्धरेत्।
गृहीत्वा कूपिकामध्यान्मर्दयेच्च दिनं ततः॥
अजाजी जीरकं हिङ्गु सर्जिका टङ्कणं जगत्।
गुग्गुलुः पञ्चलवणं यवक्षारो यमानिका॥
मरिचं पिप्पली चैव प्रत्येकं रसमानतः।
एषां कषायेण पुनर्भावयेत् सप्तधातपे॥
नागवल्लीदलयुतं त्रिगुञ्जं च रसेश्वरम्।
दद्यात्प्रवज्वरे तीव्रे सोष्णं वारि पिबेदनु॥
प्राणेश्वरो रसो नाम सन्निपातप्रकोपनुत्।
शीतज्वरे दाहपूर्वे गुल्मशूले त्रिदोषजे॥
वाञ्छितं भोजनं दद्यात् कुर्याच्चन्दनलेपनम्।
तापोद्रेकस्य शमनं बलाधिष्ठान कारकम्॥
भवेच्च नात्र सन्देहः स्वास्थ्यञ्च लभते नरः॥

शुद्ध पारा, शुद्ध गन्धक, अभ्रकभस्म और शुद्ध बछनाग समान भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अभ्रक तथा बछनागका चूर्ण मिलाकर सबको ३ दिन तालमूली के रसमें घोटकर सुखाकर सात कपड़मिट्टी की हुई आतशी शीशीमें भर दें और उसकी डाट बन्द करके उसपर भी कपड़मिट्टी करके सुखा दें। इसे गढ़ेमें रखकर पुट लगावें और उसके स्वांग शीतल होनेपर शीशीमेंसे औषधको निकालकर एकदिन निरन्तर खरल करें। तत्पश्चात् सफेद और काला जीरा, हींग, सज्जी, सुहागा, फिटकरी, गूगल, पांचो नमक, जवाखार, अजवायन, काली मिर्च और पीपल में से प्रत्येक औषध पारेके बराबर लेकर सबको एकत्र पकाकर क्वाथ बनावें और उस क्वाथसे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपरोक्त तैयार रसको धूपमें सात भावना देकर सुखाकर पीस लें।

इसे २ रत्तीकी मात्रानुसार पानमें रखकर खाना चाहिये। और नवीन तीव्र ज्वरमें देना हो तो ऊपरसे उष्ण जल भी पिलाना चाहिये।

इसके सेवनसे सन्निपातका प्रकोप, शीत ज्वर, दाहपूर्व ज्वर, गुल्म, त्रिदोषज शूल और ज्वरका प्रचण्ड ताप शान्त होता है।

इस रसके ऊपर रोगीकी इच्छानुसार भोजन देना चाहिये। तथा उसके शरीरपर चन्दनादिका लेप करना चाहिये।

(४४८३) **प्राणेश्वरो रसः** (४)

(भै. र. । ज्वराति.; र. चं.; रसें. सा. सं. । ज्वरा.)

रसगन्धकमभ्रञ्च टङ्कणं शतपुष्पकम् ।
यमानी जीरकाख्यञ्च प्रत्येकं कर्षयुग्मकम् ॥
कर्षमेकं यवक्षारं हिङ्गु पटुकपञ्चकम् ।
विडङ्गेन्द्रयवं सर्जरसकं चाग्निसम्मितम् ॥
घृष्ट्वा च वटिका कार्या नाम्ना प्राणेश्वरो रसः ॥

शुद्ध पारा, शुद्ध गन्धक, अभ्रकभस्म, सुहागेकी खील, सौंफ, अजवायन और जीरा २-२ कर्ष तथा जवाखार, हींग, पांचों नमक, वायबिडंग, इन्द्रजौ, राल और चीता १-१ कर्ष लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य औषधियोंका चूर्ण मिलाकर पानीके साथ घोटकर (१-१ मारोकी) गोलियां बना लें।

(इनके सेवनसे ज्वरातिसार नष्ट होता है।)

(४४८४) **प्लीहशार्दूलो रसः**

(भै. र.; र. रा. सुं.; रसें. सा. सं. । प्लीहा.; रसें. चिं. म. । अ. ९)

सूतकं गन्धकं व्योषं समभागं पृथक् पृथक् ।
एभिः समं ताम्रभस्म योजयेद्वैद्यसत्तमः ॥
मनःशिला वराटश्च तुत्थं रामठलौहकम् ।
जयन्ती रोहितश्चैव क्षारटङ्कणसैन्धवम् ॥
विडं चित्रं कानकञ्च रसतुल्यं पृथक् पृथक् ।
भावयेत्त्रिदिनं यावत् त्रिवृचित्रकणार्द्रकैः ॥
गुञ्जामात्रां वटीं खादेत्सद्यः प्लीहविनाशिनीम् ।
मधुपिप्पलिसंयुक्तां द्विगुञ्जां वा प्रयोजयेत् ॥
प्लीहानमग्रमांसञ्च यकृद्गुल्मंसुदुस्तरम् ।
आमाशयेषु सर्वेषु चोदरे शोथविद्रधी ॥
अग्निमांद्ये ज्वरे चैव प्लीह्नि सर्वज्वरेषु च ।
श्रीमद्गहननाथेन भाषितः प्लीहशार्दूलः ॥

शुद्ध पारद, शुद्ध गन्धक, सोंठ, मिर्च और पीपल १-१ भाग, ताम्रभस्म ५ भाग तथा मनसिल, कौड़ीभस्म, तुत्थभस्म, भुनी हुई हींग, लोह भस्म, जयन्ती, रुहेड़ेकी छाल, यवक्षार, सुहागेकी खील, सेंधानमक, बिडनमक, चीतामूल और धतूरेके बीज १-१ भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य औषधियोंका महीन चूर्ण मिलाकर सबको ३-३ दिन निसोत, चीता और पीपलके क्वाथ तथा अदरकके रसमें घोटकर १-१ रत्तीकी गोलियां बना लें।

इनमेंसे २-२ गोली पीपलके चूर्ण और शहदके साथ सेवन करनेसे प्लीहा, अग्रमांस, यकृत् दुस्साध्य गुल्म, आमाशय रोग, उदररोग, शोथ, विद्रधि, अग्निमांद्य और ज्वरका नाश होता है।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(४४८५) प्लीहान्तको रसः

(भै. र. । प्लीह.)

मृतं शुल्वञ्च तारञ्च गगनायसमौक्तिकाः ।
दरदं पुष्करं मूतं गन्धकं नवमं तथा ॥
गुग्गुलुस्त्रिकटु रास्ना तथा जैपालबीजकम् ।
त्रिफला कटुका दन्ती देवदाली तु सैन्धवम् ॥
त्रिवृता तु यवक्षारं वातारितैलमर्दितम् ।
अष्टोदराणि पाण्डुत्वमानाहं विषमज्वरम् ॥
अजीर्णमामञ्च कफं क्षयञ्च सर्वशूलकम् ।
कासं श्वासञ्च शोथञ्च सर्वमाशु व्यपोहति ॥
प्लीहान्तको रसो नाम प्लीहोदरविनाशनः ॥

ताम्रभस्म, चांदीभस्म, अभ्रकभस्म, लोहभस्म, मोतीभस्म, शुद्ध हिंगुल, पोखरमूल, शुद्ध पारद, शुद्ध गन्धक, शुद्ध गूगल, सोंठ, मिर्च, पीपल, रास्ना, शुद्ध जमालगोटा, हर्र, बहेड़ा, आमला, कुटकी, दन्तीमूल, बिंदालडोडा, सेंधानमक, निसोत और जवाखार समान भाग लेकर प्रथम पारे गन्धक की कज्जली बनावें और फिर उसमें जमालगोटा तथा गूगल डालकर थोड़ा थोड़ा अण्डीका तेल डालते हुवे अच्छी तरह घोटें । जब गूगल कज्जलीमें मिल जाय तो अन्य समस्त चीज़ोंका महीन चूर्ण मिलाकर आवश्यकतानुसार अण्डीका तेल डालकर घोटकर (६-६ रत्तीकी) गोलियां बनालें।

ये गोलियां आठ प्रकारके उदर रोग, पाण्डु, अफारा, विषमज्वर, अजीर्ण, आम, कफ, क्षय, सब प्रकारके शूल, खांसी, श्वास, शोथ और विशेषतः तिल्लीका नाश करती हैं ।

(४४८६) प्लीहारिरसः (१)

(भै. र.; र. सा. सं.; र. रा. सु. । प्लीहा.)

कर्षैकं तालचूर्णस्य तत्पादांशं सुवर्णकम् ।
पलार्द्धं मृतताम्रञ्च तत्समं शुद्धमभ्रकम् ॥
मृगाजिनस्य भस्मापि कर्षमत्र प्रदापयेत् ।
लिम्पाकाङ्घ्रित्वचस्तद्वत्सर्वमेकत्र कारयेत् ॥
गुञ्जाद्वयं प्रमाणेन वटिकां कारयेत्ततः ।
मधुना वह्निचूर्णेन खादेन्नित्यं यथाबलम् ॥
असाध्यमपि प्लीहानं हन्त्यवश्यं न संशयः ।
यकृतं पाण्डुरोगञ्च गुल्मादिकभगन्दरान् ॥

शुद्ध हरताल १ कर्ष (१। तोला), स्वर्णभस्म चौथाई कर्ष (३॥। माशे), ताम्रभस्म २॥ तोले, अभ्रकभस्म २॥ तोले, मृगचर्मकी भस्म १। तोला और बिजौरे नींबूकी जड़की छालका चूर्ण १। तोला लेकर सबको एकत्र मिलाकर पानीके साथ घोटकर २-२ रत्तीकी गोलियां बना लें।

इन्हें चित्रकमूलकी छालके चूर्ण और शहदके साथ सेवन करनेसे असाध्य प्लीहा भी अवश्य नष्ट हो जाती है। इसके अतिरिक्त ये यकृत्, पाण्डु, गुल्म और भगन्दर को भी नष्ट करती हैं।

(४४८७) प्लीहारिरसः (२)

(भै. र. । प्लीहा.)

पारदं गन्धकं टङ्कं विषं व्योषं फलत्रयम् ।
तोलकस्य समोपेतं जैपालञ्च तदर्द्धकम् ॥
किंशुकस्य रसेनैव याममात्रन्तु मर्दयेत् ।
गुञ्जामात्रां वटीं कृत्वा छायायां शोषयेत्ततः ॥
वटिकैका प्रदातव्या शृङ्गवेररसेन च ।
गुदाङ्कुरे गुल्मशूले प्लीहशोथे कफात्मके ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उदावर्ते वातशूले श्वासकासज्वरेषु च ।
रसः प्लीहारि नामायं कोष्ठामय विनाशनः ॥
आमवातगदच्छेदी श्लेष्मामयविनाशनः ॥

शुद्ध पारद, शुद्ध गन्धक, सुहागेकी खील, शुद्ध बछनाग, सोंठ, मिर्च, पीपल, हर्र, बहेड़ा और आमला १-१ तोला तथा शुद्ध जमालगोटा सबसे आधा लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य ओषधियोंका महीन चूर्ण मिलाकर सबको १ पहर केसूके फूलोंके रसमें घोटकर १-१ रत्तीकी गोलियां बनाकर छायामें सुखालें ।

इनमेंसे १-१ गोली अदरकके रसके साथ देनेसे अर्श, गुल्म, शूल, प्लीहा, कफजशोथ, उदावर्त, वातजशूल, श्वास, खांसी, ज्वर, समस्त उदर विकार और आमवात तथा कफविकार नष्ट होते हैं ।

(४४८८) प्लीहारिरसः (२)

(र. सा. सं. । प्लीह.; रसें. चिं. म. । अ. ९; र. रा. सुं. । प्ली.)

द्विकर्षं लोहभस्मापि कर्षं ताम्रं प्रदापयेत् ।
शुद्धसूतं तथा गन्धं कर्षमानं भिषग्वरः ॥
मृगाजिनं पलं भस्म लिम्पाकाङ्घ्रित्वचः पलम् ।
एवं भागक्रमेणैव कुर्यात्प्लीहारिकां वटीम् ॥
नव गुञ्जामितां खादेत्क्वाथ नित्यं हि पूतवान् ।
प्लीहानं यकृतं गुल्मं हन्त्यवश्यं न संशयः ॥

लोहभस्म २॥ तोले, ताम्रभस्म १। तोला, शुद्ध पारद और गन्धक १।-१। तोला, मृगचर्मभस्म ५ तोले और बिजौरेकी जड़की छालका चूर्ण ५ तोले लेकर प्रथम पारेगन्धककी कज्जली बनावें और फिर उसमें अन्य औषधें मिलाकर सबको पानीके साथ घोटकर ९-९ रत्तीकी गोलियां बनावें ।

इनके सेवनसे प्लीहा, यकृत्, और गुल्म अवश्य नष्ट हा जाता है ।

(व्यवहारिक मात्रा ४-६ रत्ती)

(४४८९) प्लीहारिवटिका

(भै. र. । प्ली.)

महासाराभ्रकासीसलशुनानि समानि च ।
द्रोणपुष्पीरसेनैव मर्दयेत्प्रहरत्रयम् ॥
वल्लद्वयं प्रदातव्यं प्रदोषे सलिलं ह्यनु ।
प्लीहानं यकृतं गुल्ममग्निमान्द्यं सशोथकम् ॥
कासं श्वासं तृषां कम्पं दाहं शीतं वमिं भ्रमिम् ।
प्लीहारिवटिका ह्येषा नाशयेन्नात्र संशयः ॥

एलवा, अभ्रकभस्म, कसीस और लहसन समान भाग लेकर सबको ३ पहर गूमाके रसमें घोटकर ६-६ रत्तीकी गोलियां बनावें ।

इन्हें सायङ्कालके समय पानीके साथ सेवन करनेसे प्लीहा, यकृत्, गुल्म, अग्निमांद्य, शोथ, खांसी, श्वास, तृषा, कम्प, दाह, शीत, वमन और भ्रमका नाश होता है ।

(४४९०) प्लीहार्णवो रसः

(भै. र.; र. रा. सुं.; र. चं.; र. सा. सं. । प्लीहा.; रसें. चिं. म. । अ. ९)

हिङ्गुलं गन्धकं टङ्कं [illegible]
प्रत्येकं पलिकं [illegible]

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पिप्पलीमरिचश्चैव प्रत्येकञ्च पलार्द्धकम् ।
मर्दयित्वा वटीं कुर्यात् वल्लमात्रां प्रयत्नतः ॥
सेव्या शेफालिदलजैर्वटी माक्षिकसंयुता ।
प्लीहानं षट्प्रकारञ्च हन्ति शीघ्रं न संशयः ॥
ज्वरं मन्दानलं चैव कासं श्वासं वमिं भ्रमिम् ।
प्लीहार्णव इति ख्यातो गहनानन्दभाषितः ॥

शुद्ध सिंगरफ, शुद्ध गन्धक, सुहागेकी खील, अभ्रकभस्म और शुद्ध बछनागका चूर्ण ५-५ तोले तथा पीपल और कालीमिर्चका चूर्ण २॥-२॥ तोले लेकर सबको एकत्र घोटकर अत्यन्त महीन चूर्ण बनावें और उसे पानीमें खरल करके ३-३ रत्तीकी गोलियां बना लें।

इन्हें शहदमें मिलाकर हारसिंगार के रसके साथ सेवन करनेसे ६ प्रकारका तिल्ली रोग शीघ्र ही नष्ट हो जाता है।

इसके अतिरिक्त यह गोलियां ज्वर, मन्दाग्नि, खांसी, श्वास वमन और भ्रमको भी नष्ट करती हैं।

इति पकारादिरसप्रकरणम्

अथ पकारादिमिश्रप्रकरणम् ।

(४४९१) पञ्चकोलसिद्धपेया

(वं. से. । शूल.)

श्लेष्मशूलहरा पेया पञ्चकोलेन साधिता ॥

१। तोला पञ्चकोलको २ सेर पानीमें पकाकर आधा शेष रहने पर छान लें और फिर उस पानीमें चावलोंकी पेया (कणयुक्त मांड) बनावें।

यह पेया कफज शूलका नाश करती है।

(४४९२) पञ्चगव्यम्

(भै. र. । परिभाषा.)

गोमूत्रं गोमयं क्षीरं गव्यमाज्यं दधीति च ।
युक्तमेतद्यथायोगं पञ्चगव्यमुदाहृतम् ॥

गोमूत्र, गोबर, गोदुग्ध, गोघृत और गाय का दही। इन पांचोंको **"पञ्चगव्य"** कहते हैं।

(४४९३) पञ्चमित्रम्

(यो. र. । लोहमारण प्र.)

मधुगुडघृतगुञ्जाटङ्कणं पञ्चमित्रम् ।

शहद, गुड़, घी, चौंटली और सुहागा। इन पांचोंके योगका नाम **" पञ्चमित्र "** है।

(४४९४) पञ्चमूल्यादिपेया

(इ. मा. । रक्तपि.)

शालिपर्ण्यादिना सिद्धा पेया पूर्वप्रयोगतः ।
रक्तातिसारहन्त्री च योज्या विधिरशेषतः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शालपर्णी, पृष्ठपर्णी, कटेली, कटेला और गोखरु समान भाग मिला कर १। तोला लें और २ सेर पानीमें पकाकर १ सेर पानी शेष रक्खें । इस पानीमें चावलोंकी पेया बनाकर पिलानेसे रक्तातिसार और अधोगत रक्तपित्तका नाश होता है ।

(पेया बनानेके लिये १ सेर पानी में ५ तोले चावल डालने चाहियें ।)

(४४९५) **पञ्चशिरीषोऽगदः**

(च. स. । चि. अ. । २३ विष.; ग. नि. । सर्पविष.)

शिरीषपुष्पपत्रत्वक्फलमूलकृतोऽगदः ।
सिद्धः पञ्चशिरीषोऽयं चरस्थिरविषापहः ॥

सिरसके पुष्प, पत्र, छाल, फल और मूल समान भाग लेकर कूट लें ।

यह चर (सर्पादि) और अचर (संखिया, बछनाग आदि) विष को नष्ट करनेके लिये अत्युत्तम अगद है ।

(इसे घीमें मिलाकर पिलाना चाहिये ।)

(४४९६) **पञ्चसारम्**

(वृ. नि. र.; ग. नि. । ज्वरा.)

सर्पिः क्षौद्रं शृतं क्षीरं पिप्पल्यः सितशर्कराः ।
पिबेत्खजेनोन्मथितं पञ्चसारमिति स्मृतम् ॥
विषमज्वरहृद्रोगकासश्वासक्षयापहम् ॥

घी, शहद, पकाहुवा दूध, पीपलका चूर्ण और सफेद खांड समान भाग लेकर सबको मथनीसे मथकर पीनेसे विषमज्वर, हृद्रोग, खांसी, श्वास और क्षयका नाश होता है ।

(४४९७) **पञ्चाम्लम्**

(भै. र. । परिभाषा.)

कोलदाडिमवृक्षाम्लैः साम्लवेतससंगतैः ।
चतुरम्लन्तु पञ्चाम्लं मातुलुङ्गसमायुतम् ॥

बेर, अनार, इमली और अम्लवेतके योगको "चतुराम्ल" कहते हैं । यदि इसमें बिजौरेको भी सम्मिलित कर लिया जाय तो उसका नाम "पञ्चाम्ल" हो जाता है ।

(४४९८) **पटोलादिवस्तिः**

(च. सं. । चि. अ. ३)

पटोलारिष्टपत्राणि सोशीरश्चतुरङ्गुलः ।
ह्रीवेरं रोहिणी तिक्ता श्वदंष्ट्रा मदनानि च ॥
स्थिरा बला च तत्सर्वं पयस्यर्द्धोदके शृतम् ।
क्षीरावशेषं निर्यूहं संयुक्तं मधुसर्पिषा ॥
कल्कैर्मदनमुस्तानां पिप्पल्या मधुकस्य च ।
वत्सकस्य च संयुक्तं बस्तिं दद्याज्ज्वरापहम् ॥

पटोल और नीमके पत्ते, खस, अमलतास, सुगन्धबाला, मजीठ, कुटकी, गोखरु, मैनफल, शालपर्णी और खरैटी को आधा भाग जलयुक्त दूधमें पकावें और जब दूध मात्र शेष रह जाय तो उसे छानकर उसमें शहद, घी तथा मैनफल, नागरमोथा, पीपल, मुलैठी और इन्द्रजौका कल्क मिला कर उसकी बस्ति दें । इससे ज्वर नष्ट होता है ।

(यह बस्ति विषम ज्वरमें हितकारी है ।)

(४४९९) **पथ्यायोगः**

(वै. म. र. । पट. ४)

प्रसेकशमनी पथ्या भुक्तस्योपरि चर्विता ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोजनके बाद हर्र चबानेसे प्रसेक (मुंहसे लार बहना) नष्ट होता है ।

(४५००) **पद्मिनीपत्रयोगः**

(वृ. नि. र.; वं. से. । क्षुद्ररो.)

पद्मिनीकोमलं पत्रं यः खादेच्छर्करान्वितम् ।
एतन्निश्चित्य निर्दिष्टं न तस्य गुदनिर्गमः ॥

कमलिनीके कोमल पत्तों को खांड मिलाकर सेवन करनेसे कांच निकलना बन्द हो जाता है ।

पर्पटाद्यरिष्टः

(भै. र.)

पर्पटं तुलायेकां चतुर्द्रोणे जले पचेत् ।
क्वाथे पादावशेषे च शीते पलशतद्वयम् ॥
दद्याद् गुडस्य धातक्याः पलषोडशिका मता ।
गुडूची मुस्तकं दार्वी दारु व्याघ्री दुरालभा ॥
चव्यं चित्रकमूलञ्च त्रिकटु क्रिमिनाशनः ।
सर्वाण्येतानि सञ्चूर्ण्य पलांशेन विनिक्षिपेत् ॥
स्थापयित्वा ततो भाण्डे मासादूर्ध्वं पिबेदमुम् ।
पाण्डुगुल्मोदराष्ठीलाकामलाश्च हलीमकम् ॥
प्लीहानं यकृतं शोथं सर्वञ्च विषमज्वरम् ।
भरंगीकी जड़, चिरचिटे (अपामार्ग) की जड़, चन्दन और मनसिलके समान भाग—मिश्रित महीन चूर्णको शहदमें मिलाकर लेप करनेसे उपदंश (आतशक) के घावोंको शीघ्र ही आराम हो जाता है।

(४९१२) **भार्ग्यादिलेपः** (२)

(व. से. । अन्त्रवृद्धिरो.; रा. मा. । वृद्ध्युपदंश. १६)

तथाम्बुना तु सम्पिष्टं मूलं भार्ङ्ग्याः प्रलेपनात् ।
कुरण्डं गण्डमालाश्च हन्त्यवश्यं न संशयः ॥

भरंगीकी जड़को पानीके साथ अत्यन्त महीन पीसकर लेप करनेसे अण्डवृद्धि और गण्डमाला अवश्य नष्ट हो जाती हैं।

(४९१३) **भूम्यामलक्याद्यो लेपः**

(वै. म. र. । पटल १६)

तामलकी नेत्ररुजं पिष्टा स्तन्येन ताम्रान्ता ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सेवाक्षिरोगमभिनवमपनयति विलेपनान्मूर्ध्नि ॥

मुईआमलेको जीके दूधके साथ ताम्रपात्रमें घोटकर शिरपर लेप करनेसे नवीन नेत्राभिष्यन्द नष्ट होता है ।

(४९१४) **भूस्तृणादियोनिलेपः**

(ग. नि. । वन्ध्या. ५)

भूस्तृणस्य तु मूलानि वचा मुञ्जातकं तथा ।
समभागानि मधुना योनिलेपो निशामुखे ॥
शोभनं जनयेत्पुत्रं बलवीर्यसमन्वितम् ॥

गन्धतृणकी जड़, बच और मूंज समान भाग लेकर सबको अत्यन्त महीन पीसकर शहदमें मिला कर रातको योनिमें लेप करनेसे बलवीर्यवान् सुन्दर पुत्र उत्पन्न होता है ।

(४९१५) **भृङ्गराजादिलेपः (१)**

(भा. प्र. । म. खं. क्षुद्ररोगा.)

भृङ्गराजकमूलस्य रजन्या सहितस्य च ।
चूर्णन्तु सहसा लेपाद्वाराहद्विजनाशनम् ॥

भंगरेकी जड़ और हल्दी के चूर्णका लेप करनेसे वाराहदंष्ट्र (गुदभ्रंश रोगका एक भेद) नष्ट होता है।

(४९१६) **भृङ्गराजादिलेपः (२)**

(वृ. नि. र. । त्वग्दोषा.)

भृङ्गराजहरीतक्योर्मूलमन्तः पुटे दहेत् ।
आरनालेन तल्लेपाच्छ्वेतकुष्ठविनाशनम् ॥

भंगरेकी जड़ और हर्रकी जड़ समान भाग लेकर दोनोंको बरतनमें बन्द करके जलावें ।

इस भस्मको काञ्जीमें पीसकर लेप करनेसे श्वेत कुष्ट नष्ट होता है ।

(४९१७) **भृङ्गराजादिलेपः (३)**

(र. र. । उपदंशा.)

मार्कवस्त्रिफलादन्तीताम्रचूर्णमयोरजः ।
उपदंशं निहन्त्येतद्वृक्षमिन्द्राशनिर्यथा ॥

भंगरा, हर्र, बहेड़ा, आमला, दन्तीमूल, ताम्र-चूर्ण और लोहचूर्ण समान भाग लेकर सबको अत्यन्त महीन पीस लें ।

इसका लेप करनेसे उपदंश अत्यन्त शीघ्र नष्ट हो जाता है ।

(४९१८) **भृङ्गराजादिलेपः (४)**

(हा. सं. । स्था. ३ अ. ३१)

भृङ्गराजरसं गृह्य तथा च सुरसादलम् ।
निष्पावकपटोलानां पत्राणि काञ्जिकेन तु ॥
पिष्ट्वा वातपीडिकानां लेपनं मेहनस्य च ॥

तुलसीके पत्ते, चैांटलीके पत्ते और पटोलके पत्ते १-१ भाग लेकर सबका महीन चूर्ण बनाकर उसमें १ भाग भंगरेका रस मिलावें ।

इसे कांजीमें पीसकर लेप करनेसे वातज प्रमेहपिडिका नष्ट होती हैं ।

(४९१९) **भृङ्गविषनाशकलेपः**

(यो. त. । त. ७८)

नागरं गृहकपोतपुरीषं
बीजपूरकरसो हरितालम् ।
सैन्धवं च विनिहन्ति विलेपा
दाशु भृङ्गजनितं विषमेतत् ॥

सोंठ, पालतु कबूतरकी बीट, हरताल और सेंधा नमक समान भाग लेकर महीन चूर्ण बनावें।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इसे बिजौरे नीबूके रसमें पीसकर लेप करनेसे भौंरेका विष तुरन्त नष्ट हो जाता है ।

(४९२०) भृङ्गादिलेपः

(वै. म. र. । पटल १६)

जित्वेन्द्रलुप्तं रोमाणि जनयेद्भृङ्गजो रसः ।
चिञ्चामलकयोश्चापि काललोहसमन्वितः ॥

भंगरेके अथवा इमली और आमले के रसमें कृष्ण लोहके महीन चूर्णको पीसकर लेप करनेसे इन्द्रलुप्त (गंज) का नाश होकर बाल निकल आते हैं ।

इति भकारादिलेपप्रकरणम् ।

अथ भकारादिधूपप्रकरणम् ।

(४९२१) भुजङ्गादिनाशकधूपः

(व. से. । कृमि.)

लाक्षा भल्लातकश्च श्रीवासः श्वेताऽपराजिता ।
अर्जुनस्य फलं पुष्पं विडङ्गं सर्जगुग्गुलुः ॥
एभिः कृतेन धूपेन शाम्यन्ति नियतं गृहे ।
भुजङ्गमूषकादंशाघुणामशकमत्कुणाः ॥

लाख, भिलावा, तारपीनका तेल, सफेद कोयल, अर्जुनके फल और पुष्प, बायबिडंग, राल और गूगल समान भाग लेकर गूगलको तारपीनके तेलमें घोट लें और अन्य ओषधियोंका चूर्ण करके उसमें मिला लें ।

घरमें इसकी धूप देनेसे सांप, चूहे, डांस घुण, मशक और खटमल दूर हो जाते हैं ।

इति भकारादिधूपप्रकरणम् ।

अथ भकाराद्यञ्जनप्रकरणम् ।

(४९२२) भद्रमुस्तायोगः

(ग. नि. । नेत्ररोगा.)

छागमूत्रेण सङ्घृष्टभद्रमुस्ताञ्जनेन हि ।
चिरकालोद्भवं पुष्पं रक्तत्वं चापि नश्यति ॥

बकरीके मूत्रमें नागरमोथेको घिसकर आंखमें आंजनेसे पुरानी फूली और आंखोंकी लाली नष्ट हो जाती है ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(४९२३) **भानुमतीवर्तिः** (१) (लघु)

(ग. नि. । नेत्ररोगा. ३)

बीजं करञ्जवृक्षस्य निस्तुषं द्विदलीकृतम् ।
चूर्णितं भावयेत्सम्यङ्मुख्याञ्जनदशांशकम् ॥
जातीरसे त्रिसप्ताहं पिष्ट्वा तेनैव कल्पिता ।
वर्तिर्भानुमती नाम छायायां परिशोषिता ॥
तोयघृष्टाऽञ्जनाद्धन्ति तिमिरं भास्करो यथा ।
सुखस्वभावबोधं च कुरुते शीलिता ध्रुवम् ॥

करञ्जके बीजोंका छिलका अलग कर दें और फिर उनका बारीक चूर्ण बना लें। तदनन्तर उसमें उससे दस गुना काला सुरमा मिलाकर सबको २१ दिन तक चमेली के रसमें घोटकर वर्तियां बना लें और उन्हें छायामें सुखाकर रक्खें।

इन्हें पानीमें घिसकर आंखमें आंजनेसे तिमिर नष्ट होता है।

(४९२४) **भानुमतीवर्तिः** (२) (वृहत्)

(ग. नि. । नेत्ररोगा.; र. का. धे. । अ. ५३)

शुक्लोपला जलनिधिप्रभवश्च फेनः
शैलेयचन्दनयुता खलु शङ्खनाभिः ।
भागानिमान् समरिचान् समनःशिलांशान्
कुर्याद्रसाञ्जनचतुर्गुणसंप्रयुक्तान् ॥
नक्तान्ध्यपिल्लतिमिरक्षतकाचकण्डू-
शुक्लाक्षिपाककफदोषकृतांश्च रोगान् ।
भानुर्यथैव तिमिराण्यपहन्ति नूनं
मध्वायुता जयति भानुमतीह वर्तिः ॥

मिश्री, समुद्रफेन, भूरिछरीला, लाल चन्दन, शंखनाभि, कालीमिर्च और मनसिल १-१ भाग तथा रसौत ४ भाग लेकर सबको अत्यन्त बारीक खरल करके वत्तियां बना कर छाया में सुखा लें। इन्हें आंखमें लगानेसे नक्तान्ध्य (रतौंधा), पिल्ल, तिमिर, क्षत, काच, कण्डू, फूला, नेत्रपाक और अन्य कफज रोग नष्ट होते हैं।

(४९२५) **भास्करचूर्णम्**

(वा. भ. । उ. अ. १३)

निर्दग्धं बादराङ्गारैस्तुत्थं नेत्थं निषेचितम् ।
क्रमादजापयः सर्पिः क्षौद्रे तस्मात्पलद्वयम् ॥
कार्पिकैस्ताप्यमरिचस्रोतोजकटुकानतैः ।
पटुरोध्रशिलापथ्याकणैलाञ्जनफेनिकैः ॥
युक्तं पलेन यष्ट्याश्च मूषान्तर्ध्मातचूर्णितम् ।
हन्ति काचार्मनक्तान्ध्यरक्तराजीः सुशीलितः ॥
चूर्णो विशेषात्तिमिरं भास्करो भास्करो यथा ॥

नीले थोथेको बेरीके कोयलोंकी अग्निपर तपा तपाकर क्रमशः बकरीके दूध, घी और शहद में बुझावें। तदनन्तर यह नीलाथोथा १० तोले, स्वर्णमाक्षिक-भस्म तथा मिरच, स्रोतोञ्जन (सुरमा), कुटकी, तगर, सेंधानमक, लोध, कपूर, हर्र, पीपल, इलायची, रसौत और समुद्रफेनका चूर्ण १।-१। तोला तथा मुलैठीका चूर्ण ५ तोले लेकर सबको एकत्र मिलाकर शरावसम्पुटमें बन्दकरके भस्म करें और फिर अत्यन्त बारीक पीसकर सुरक्षित रक्खें।

इसे आंखोंमें लगानेसे काच, अर्म, नक्तान्ध्य (रतौंधा) आंखोंकी लाल रेखाएं और विशेषतः तिमिर नष्ट होता है।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(४९२६) भास्करवर्तिः

(व. से. । नेत्ररोगा.; र. का. धे. । अ. ५३)

त्रिंशद्भागन्तु नागस्य गन्धपाषाणपञ्चकम् ।
शुल्वतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनत्रयम् ॥
अन्धमूषागतं ध्मातं पक्वं विमलमञ्जनम् ।
तिमिरान्तककृल्लोके द्वितीयो भास्करो यथा ॥

शुद्ध सीसा ३० भाग, शुद्ध गन्धक ५ भाग, शुद्ध ताम्र और हरताल २-२ भाग, शुद्ध बंग १ भाग और सुरमा ३ भाग लेकर धातुओंको रेतीसे रितवाकर बारीक चूर्ण करा लें और पीसने योग्य ओषधियोंको पिसवा लें । तत्पश्चात् सबको शराव सम्पुटमें बन्द करके भस्म करें और फिर बारीक पीसकर अञ्जन बना लें ।

इसे आंखमें लगानेसे तिमिर नष्ट होता है ।

(४९२७) भास्कराञ्जनम्

(वै. म. र. । पटल १६)

ताम्रपात्रघृष्टमम्लकाञ्जिकाच्छवारिणा ॥
परिणतनक्तमालतरुवल्कजः कुडवं
कुडवमथोषणस्य लिकुचस्य फलस्वरसम् ।
द्विकुडवमाढकेन पयसा च गवां सहितं
दिवसमुखे विशुद्धकलशेऽथ सुसंस्क्रियताम् ॥
अन्येद्युर्बहुशः खजेन मथितात्तस्माद्गृहीत्वा रसं
प्रक्षाल्य प्रबलेन कंसयुगलेनाकार्ष्ण्यभावं शनैः ।
सङ्घृष्येन्दुविमिश्रितं तिमिरजिद् स्यादञ्जितं स्वल्पशः
सायं सीसशलाकया प्रतिदिनं नाम्ना त्विदं भास्करम् ॥

करञ्जकी छालका चूर्ण २० तोले लेकर उसे ताम्रपात्रमें कांजीके स्वच्छ जलसे अच्छी तरह खरल करें और फिर एक स्वच्छ कलशमें यह चूर्ण तथा २० तोले कालीमिर्चका चूर्ण और १ सेर लकुचके फलोंका रस और ८ सेर गायका दूध डालकर उसका मुख बन्द करके रखदें । इसे पहिले दिन प्रातःकाल से दूसरे दिन प्रातःकाल तक इसी प्रकार रहने दें और फिर उसे मथनीसे खूब अच्छी तरह मथकर वस्त्रसे छानकर स्वच्छ रस निकालें ।

इस रसमें थोड़ासा कपूर डालकर उसे कांसी और कांस्यमाक्षिकके टुकड़ेसे इतना घिसें कि जिससे समस्त रस काला हो जाय ।

इसे सायङ्कालके समय सीसेकी सलाईसे आंखोंमें लगानेसे तिमिर नष्ट हो जाता है ।

(४९२८) भीमसेनीकर्पूरः

(यो. र. । नेत्ररोगा.)

सुधांशोर्वसुभागाः स्युरेलाभागद्वयं तथा ।
चन्दनं चाब्धिफेनं च बीजं कतकसम्भवम् ॥
रसाञ्जनं भद्रमुस्तं प्रत्येकं कर्षसम्मितम् ।
सर्वं दुग्धे विमर्द्याथ पिण्डे गोधूमपिष्टवत् ॥
कृत्वा पात्रे निधायाथ क्षिपेत्पात्रं तथोपरि ।
अधः प्रज्वालयेद्दीपं वर्त्याऽङ्गुष्ठसमानया ॥
एवं प्रहरपर्यन्तं वह्निं कुर्याच्च युक्तितः ।
पात्रस्योपरिभागं तु शीतलं रक्षयेद्बुधः ॥
सदाऽऽर्द्रचैलखण्डेन शीतलेन च वारिणा ।
स्वाङ्गशीतं ततो ज्ञात्वा पश्चात्कर्पूरमाहरेत् ॥
स्फटिकाकारमत्यच्छं श्वेतहीरमणिप्रभम् ।
भीमसेनाख्यकर्पूरमौषधेषु प्रयोजयेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कपूर ८ भाग, छोटी इलायचीके दाने २ भाग, सफेद चन्दन, समन्दर झाग, निर्मलीके फल, रसौत और नागरमोथेका चूर्ण १-१ भाग लेकर सबको गायके दूधमें घोटकर उसकी टिकिया बना लें और उसे कांसीके पात्रमें रखकर कांसीकी कटोरीसे ढक दें तथा दोनों के जोड़को उड़दके आटेसे बन्द कर दें। तत्पश्चात् उसके नीचे दीपक जलावें। दीपक की बत्ती अंगूठे के समान मोटी होनी चाहिये। ऊपर वाले बरतन पर भीगा हुवा कपड़ा रखकर उसे ठंडा रखना चाहिये।

इसी प्रकार १ पहर तक दीपक जलाने के पश्चात् पात्रके स्वांग शीतल होने पर सन्धि को खोलकर ऊपरके पात्रमें लगे हुवे स्फटिक मणि और सफेद हीरोंके समान स्वच्छ कर्पूर को निकाल लें।

यही भीमसेनी कर्पूर है जो अनेक प्रयोगों में पड़ता है।

(४९२९) **भैरवाञ्जनम्**

(वै. र.। ज्वर.; र. का. धे.। अ. १; र. रा. सु.। ज्वरा.)

सूततीक्ष्णकणागन्धमेकांशं जयपालकम्।
सर्वैस्त्रिगुणितं जुम्भवारिपिष्टं दिनाष्टकम्॥
नेत्राञ्जनेन हन्त्याशु सर्वोपद्रवयुग्ज्वरम्॥

शुद्ध पारद, फौलादभस्म, पीपल का चूर्ण और शुद्ध गन्धक १-१ भाग तथा शुद्ध जमाल गोटा १२ भाग लेकर सबको ८ दिन तक जम्भीरी नीबूके रसमें घोटकर अत्यन्त महीन चूर्ण बनावें।

इसे आंखमें लगानेसे उपद्रव सहित समस्त ज्वर नष्ट हो जाते हैं।

(नोट—यह प्रयोग सावधानी पूर्वक बनाना और अनुभवी वैद्यके परामर्श से प्रयुक्त करना चाहिये। जमाल गोटे में तेलका अंश बिल्कुल न रहने देना चाहिये।)

इति भकाराद्यञ्जनप्रकरणम्।

अथ भकारादिनस्यप्रकरणम्।

(४९३०) **भस्मेश्वररसः** (नस्य)

(र. का. धे.। अ. १)

आरण्यगोमयं शुष्कं शुष्कं दग्ध्वा प्रकल्पयेत्।
तत्पुटेदर्कदुग्धेन शुष्कं वारत्रयेण च॥
छिक्किकामेतदर्धा तु कट्फलं छिक्किकार्धकम्।
मरिचं छिक्किकातुल्यं वस्त्रपूतं प्रकल्पयेत्॥
नस्येन रक्तिकामानं भक्षणेऽपि च तन्मतम्।
कफवातभवां पीडां शिरोङ्नासिकागताम्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अयं भस्मेश्वरो नाम नाशयेन्नात्र संशयः ॥

सूखे अरण्य उपलोंको भस्मको आकके दूध की ३ भावना देकर सुखा लें और फिर उसमें उससे आधा नकछिकनीका चूर्ण और उतना ही काली मिर्चका चूर्ण तथा मिर्चसे आधा कायफलका चूर्ण मिलाकर सबको अच्छी तरह घोटकर कपड़े से छान लें।

इसमें से १ रत्ती चूर्ण सूंघने तथा खानेसे शिर, हृदय और नासिकाकी कफवातज पीड़ा अवश्य नष्ट हो जाती है।

(४९३१) भूतोन्मादनाशकनस्यम्

(ग. नि.। भूतोन्मादा.)

नस्येन च गोमूत्रे देवाधिपवारुणीफलं पक्वम्।
नाशयति पिशाचग्रहशाकिनिभूतादिरक्षांसि ॥

इन्द्रायणके पक्के फलको गोमूत्र में पीसकर नस्य देनेसे पिशाच, ग्रह, शाकिनी, भूत और राक्षस विकार नष्ट होते हैं।

(४९३२) भृङ्गराजादिनस्यम्

(व. से.। शिरो.; वृ. नि. र.; यो. र.। शिरोरोगा.)

भृङ्गराजरसश्छागक्षीरतुल्योऽर्कतापितः।
सूर्य्यावर्त्तं निहन्त्याशु नस्येनैव प्रयोजितः ॥

भंगरेका रस और बकरीका दूध बराबर बराबर लेकर दोनोंको एकत्र मिलाकर धूपमें गर्म करके नस्य लेनेसे सूर्यावर्त्त रोग शीघ्र ही नष्ट हो जाता है।

इति भकारादिनस्यप्रकरणम्।

अथ भकारादिकल्पप्रकरणम्।

(४९३३) भृङ्गराज-कल्पः

(र. चि. म.। स्त. ९)

अथातो भृङ्गराजस्य कल्पमव्ययकारकम्।
प्रवक्ष्यामि जरादुःखनाशनं जीविते हितम् ॥
गृहीत्वा भृङ्गराजस्य लघुबीजानि यानि च।
समादाय ततस्तानि वापयेच्च समन्ततः ॥
त्रिफलाजलसिक्तानि रोहयेदतियत्नतः।
उत्पद्यते तदा तस्माद् भृङ्गराजोतिकोमलः ॥
मृदुपल्लवसंकीर्णभूतलः प्रबलः फलः।
तदर्धं प्रत्यहं नीत्वा कवलं तिलमिश्रितम् ॥
शेफालिकापत्ररसं तत्कालमनुपाययेत्।
तच्चुलूकद्वयं नित्यं शीतलं शीलितं भवेत् ॥
ताम्बूलं भक्षयेत्पश्चाद्गन्धपूगादिसंस्कृतम्।
एवं च प्रत्यहं कुर्यात्कल्पे श्रद्धापरो नरः ॥
द्वियामाद्भुज्यते पथ्यं दुग्धं भक्तं सशर्करम्।
अथ मुद्गघृतं नान्यद्भुज्यते पथ्यसेवने ॥
अनेन शुभमार्गेण कर्तव्यं कल्पसेवनम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोमला निर्मलाः केशा वृद्धानामपि देहिनाम् ॥
जायन्ते सकले देहे कल्पकर्तुर्न संशयः ।
शरीरं नूतनं कुर्याद्दृढा दन्ता भवन्ति च ॥
अतिप्रभं शुभं तस्य शरीरं जायतेतराम् ।
एवं षण्मासपर्यन्तं भृङ्गराजस्य नित्यशः ॥
कल्पं कुर्यात्प्रयत्नेन नरो देवसमो भवेत् ।
माहात्म्यं शक्यते नास्य वक्तुं कल्पशतैरपि ॥

भंगरेके सूक्ष्म बीजोंको बो कर त्रिफलेके क्वाथ से सींचें। इससे जो भंगरा उत्पन्न होगा वह अत्यन्त कोमल होगा। प्रति दिन प्रातः काल उसके कोमल कोमल पत्ते (कोंपल) लेकर तिलोंके साथ मिलाकर चबावें और ऊपर से २ चुल्लू संभालुका स्वरस बिना गर्म किये हुवे ही पी जायं। तत्पश्चात् सुपारी और इलायची आदि सुगन्धित पदार्थ युक्त पान खावें।

इसके २ पहर बाद दूध, भात, खांड, मूंग और घृतयुक्त भोजन करें। इनके अतिरिक्त अन्य कोई चीज़ न खावें।

इस प्रकार ६ मास तक भृंगराज सेवन करनेसे वृद्ध मनुष्यके बाल भी कोमल और निर्मल हो जाते हैं। शरीर नवीन और दांत दृढ़ हो जाते हैं तथा शरीर अत्यन्त कान्तिमान् देवतुल्य हो जाता है।

इति भकारादिकल्पप्रकरणम् ।

अथ भकारादिरसप्रकरणम् ।

(४९३४) भक्तपाकवटी (बृहत्)
(भुक्तपाकवटी)
(र. सा. सं.; र. रा. सु. । अजीर्णा.)

अभ्रं पारदगन्धकौ सदरदौ ताम्रञ्च तालं शिला
वङ्गञ्च त्रिफला विषञ्च कुनटी भाव्याश्च दन्त्यम्बुना ।
शृङ्गी व्योषयमानिचित्रजलदं द्वे जीरके टङ्कणं
एलापत्रलवङ्गहिङ्गुकुटकीजातीफलं सैन्धवम् ॥
एतान्यार्द्रकचित्रदन्तिसुरसावासानीरैर्बिल्वजैः
पत्रोत्थैरपि सप्तधा सुविमले खल्ले विभाव्यान्यतः ।
खादेद्वल्लमितं तथा च सकलव्याधौ प्रयोज्या बुधै-
र्विड्बन्धे कफजे त्रिदोषजनिते शामानुबन्धेऽपि च ॥
मन्दाग्नौ विषमज्वरे च सकले शूले त्रिदोषोद्भवे
हन्यात्तानपि भक्तपाकवटिका भूयश्च सामं जयेत् ॥

अभ्रकभस्म, शुद्ध पारद, शुद्ध गन्धक, शुद्ध शिंगरफ (हिंगुल), ताम्र भस्म, हरताल, दन्तीके क्वाथमें घोटा हुवा मनसिल, बंगभस्म, हर्र, बहेड़ा, आमला, शुद्ध बछनाग, काकड़ासिंगी, सोंठ, मिर्च, पीपल, अजवायन, चीतेकी जड़, नागरमोथा, सफेद

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जीरा, कालाजीरा, सुहागेकी खील, इलायची, तेजपात, लौंग, हींग, कुटकी, जायफल और सेंधानमक समान भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें भस्में तथा अन्य औषधोंका चूर्ण मिलाकर सबको अदक, चीता, दन्तीमूल, तुलसी, बासा और बेलके पत्तोंके स्वरस या काथकी सात सात भावना देकर ३-३ रत्तीकी गोलियां बना लें।

इनके सेवनसे मलबन्ध, कफप्रधान सन्निपात, आम, अग्निमांद्य, विषम ज्वर तथा समस्त प्रकारके शूल नष्ट होते हैं।

भक्तवारिगुटिका

(व. से. । परिणाम शूला.)

पानीयभक्तवटी सं. ४३२५ देखिये ।

(४९३५) भक्तविपाकवटी

(भक्तपाचकगुटिका)

(रसे. सा. सं. । अजीर्णा.; र. र. । रसायना. र. च. । अजीर्णा.)

माक्षिकं रसगन्धौ च हरितालं मनःशिला।
गगनं कान्तलौहं च सर्वमेषां समांशकम् ॥+
त्रिवृद्दन्तीवारिवाहं चित्रकञ्च महौषधम्।
पिप्पली मरिचं पथ्या यमानी कृष्णजीरकम् ॥
रामठं कटुका पाठा सैन्धवं साजमोदकम्।
जातीफलं यवक्षारं समभागं विचूर्णयेत् ॥
आर्द्रकस्य रसेनैव निर्गुण्ड्याः स्वरसेन च।
सूर्य्यावर्त्तरसेनैव तुलस्याः स्वरसेन च ॥
आतपे भावयेद्वैद्यः खल्पपात्रे च निर्म्मले।
पेषयित्वा वटीं खादेद्गुञ्जाफलसमप्रभाम् ॥

+ कई ग्रन्थोंमें यह श्लोकार्द्ध नहीं है।

स्वर्णमाक्षिक भस्म, शुद्ध पारा, शुद्ध गन्धक, शुद्ध हरताल, शुद्ध मनसिल, अभ्रकभस्म, कान्त लोहभस्म, निसोत, दन्तीमूल, नागरमोथा, चीतामूल, सोंठ, पीपल, काली मिर्च, हर्र, अजवायन, काला जीरा, हींग कुटकी, पाठा, सेंधा नमक, अजमोद, जायफल और जवाखार समान भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य औषधोंका महीन चूर्ण मिलाकर सबको धूपमें अद्रक, संभालु, हुलहुल और तुलसीके स्वरसकी १-१ भावना देकर अच्छी तरह घोटकर १-१ रत्तीकी गोलियां बना लें।

इनके सेवनसे अग्नि प्रदीप्त होती है।

(गुणोंके लिये "भुक्तोत्तरीया वटी" देखिये)

(४९३६) भक्तोत्तरचूर्णम्

(भै. र. । वृद्धिरोगा.)

अभ्रकं गन्धकञ्चैव पिप्पली लवणानि च।
त्रिक्षारं त्रिफला चैव हरितालं मनःशिला ॥
पारदं चाजमोदा च यमानी शतपुष्पिका।
जीरकं हिङ्गु मेथी च चित्रकं चविका वचा ॥
दन्ती च त्रिवृता मुस्ता शिला च मृतलौहकम्।
अञ्जनं निम्बबीजानि पटोलं वृद्धदारकम् ॥
सर्वाणि चाक्षमात्राणि श्लक्ष्णचूर्णानि कारयेत्।
शतं कनकबीजानि शोधितानि प्रयोजयेत् ॥
एतदग्निविवृद्ध्यर्थमृषिभिः परिकीर्त्तितम्।
श्लीपदान्यन्त्रवृद्धिञ्च वातवृद्धिञ्च दारुणाम् ॥
अरुचिं चामवातञ्च शूलं वातसमुद्भवम्।
गुल्मं चैवोदरव्याधीन्नाशयत्याशु तत्क्षणात् ॥
भक्तोत्तरमिदं चूर्णमश्विभ्यां निर्मितं पुरा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभ्रकभस्म, शुद्ध गन्धक, पीपल, सेंधानमक, काला नमक, बिडलवण, सामुद्र लवण, सांभर, जवाखार, सज्जीखार, सुहागा, हर्र, बहेड़ा, आमला, शुद्ध हरताल, शुद्ध मनसिल, शुद्ध पारा, अजमोद, अजवायन, सौंफ, जीरा, हींग, मेथी, चीतामूल, चव, बच, दन्तीमूल, निसोत, नागरमोथा, शिलाजीत, लोहभस्म, सुरमा, नीमके बीज (निबौली) की गिरी, पटोल और विधारा १।-१। तोला तथा शुद्ध धतूरेके बीज १०० नग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य ओषधियोंका महीन चूर्ण मिलाकर सबको अच्छी तरह घोटकर रक्खें।

इसके सेवनसे अग्नि दीप्त होती और श्लीपद, अन्त्रवृद्धि, भयंकर वातवृद्धि, अरुचि, आमवात, वातज शूल, गुल्म और उदररोग नष्ट होते हैं।

(मात्रा १-१॥ माशा ।)

भगन्दरहररसः

(रसे. चि. म. । अ. ९; रसे. सा. सं.; र. रा. सु. । भगन्दर.; र. का. धे. । अ. ४९.)

रविताण्डवरस देखिये ।

(४९३७) भगन्दरारिरसः

(र. का. धे. । अ. ४९)

सूतं गन्धं मृतं ताम्रमभ्रकं दरदं समम् ।
मरिचं द्विगुणं दत्त्वा मर्दयेच्चित्रकाम्बुना ॥
भि॥दनं भक्षयेन्नित्यं मधुना रक्तिकाद्वयम् ।
भगन्दरं जयेच्छीघ्रं सविषं शम्भुशासनात् ॥

शुद्ध पारा, शुद्ध गन्धक, ताम्रभस्म, अभ्रकभस्म और शुद्ध हिंगुल १-१ भाग तथा कालीमिर्चका चूर्ण सबसे दो गुना लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य औषधें मिलाकर सबको १ दिन चीतेके काथमें घोटकर २-२ रत्तीकी गोलियां बना लें।

इन्हें शहदके साथ सेवन करनेसे भगन्दर शीघ्र ही नष्ट हो जाता है।

(४९३८) भगन्दरोपदंशारिरसः

(र. का. धे. । अ. ४८)

रससोरककाशीशतुवरीटङ्कणं विषम् ।
पक्वस्तु डमरूयन्त्रे रसोऽयं हि द्विगुञ्जकः ॥
भगन्दरारिः कथितो दृष्टश्चाऽयं भिषग्वरैः ॥

शुद्ध पारा, शोरा, कसीस, फटकी, सुहागा और शुद्ध बछनाग समान भाग लेकर सबको एकत्र खरल करके (४ पहर) डमरुयन्त्रमें पकावें और फिर उसके स्वांग शीतल होने पर निकालकर सुरक्षित रक्खें ।

इसे २ रत्तीकी मात्रानुसार सेवन करनेसे भगन्दर और उपदंश नष्ट होता है ।

(सेवन विधि—औषधको ढेंगके कल्कमें लपेटकर निगलवा देना चाहिये । भोजनमें नमक न देना चाहिये ।)

भल्लातकलोहः

(च. द. । अर्श.)

" भल्लातकलेहः " प्रयोग सं. ४८५९ देखिये ।

(४९३९) भल्लातकादियोगः

(ग. नि. । गुल्मा.)

भल्लातकं पिप्पलीं च लोहचूर्णं शिलाजतु ।
लशुनं वा प्रयुञ्जीत विधिवद्गुल्मशान्तये ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुद्ध भिलावा, पीपल, लोहभस्म और शिलाजीत समान भाग लेकर एकत्र खरल करें।

इसे या लहसनको यथोचित मात्रानुसार सेवन करनेसे गुल्म नष्ट होता है।

(मात्रा—४—६ रत्ती)

(४९४०) भस्मवटी

(र. रा. सु. । अजीर्णा.)

चूर्णीकृतं पञ्चपलं तुषाम्ले
स्विन्नं शिवायुग्विषतिन्दुबीजम् ।
हिङ्गु क्रमिघ्नं त्रिपटु त्रिदीप्यं
पलं पृथक् त्र्यूषणगन्धयुक्तम् ॥
चूर्णीकृतं निम्बुरसेन भाव्यं
कोलास्थिमात्रा वटिका विधेया ।
संसेविता हन्ति नृणामजीर्णं
हृद्रोगगुल्मं क्रमिजांश्च रोगान् ॥
प्लीहाग्निमान्द्यार्त्तिमथामवातं
शूलातिसारं ग्रहणीरुजं च ।
जलोदरार्शं क्रमिजांश्च रोगा-
निहन्याद्बहून् वातकफोद्भवांश्च ॥

५—५ पल कुचला और हर्रको कपड़ेकी पोटलीमें बांधकर दोलायन्त्र—विधिसे १ दिन कांजीमें पकावें और फिर हर्रोंकी गुठली निकाल दें और कुचलेको छील डालें तथा उसके भीतरकी पत्ती भी निकाल दें। तदनन्तर दोनोंको पीस लें और हींग, बायबिड़ंग, सेंधानमक, कालानमक, सांभर, देसी अजवायन, खुरासानी अजवायन, अजमोद, सोंठ, मिर्च, पीपल और गन्धकका चूर्ण १—१ पल (५—५ तोले) मिलाकर सबको १ दिन नीबूके रसमें घोटकर बेरकी गुठलीके बराबर गोलियां बनाकर रख लें।

इनके सेवनसे अजीर्ण, हृद्रोग, गुल्म, कृमिजन्य रोग, तिल्ली, अग्निमांद्य, आमवात, शूल, अतिसार, संग्रहणी, जलोदर, अर्श और अन्य बहुतसे वातकफज रोग नष्ट होते हैं।

(४९४१) भस्मसूतरसः

(र. का. धे. । अ. १०)

अजाजीधान्यपथ्याभिः सक्षौद्रैः सकटुत्रिकैः ।
एतैः सार्धं भस्मसूतः सद्यो वान्तिं विनाशयेत् ॥

जीरा, धनिया, हर्र और सोंठ, मिर्च तथा पीपलका चूर्ण समान भाग लेकर उसमें पारदभस्म मिलाकर शहदके साथ चाटनेसे वमन शीघ्र ही नष्ट हो जाती है।

(चूर्णकी मात्रा १ से ३ माशे तक। पारद भस्म १ से २ रत्ती तक। शहद २ तोले।)

(४९४२) भस्मामृतरसः (१)

(रसे. चि. म. । अ. ९)

पलैकं मूर्च्छितं सूतं मरिचं हिङ्गु जीरकम् ।
प्रतिकर्षं वचाशुण्ठि तत्सर्वमार्कव द्रवैः ॥
दिनं पिष्ट्वा लिहेन्मासं मधुना वह्निदीप्तये ।
कर्षैकं भक्षयेच्चानु दाडिमं नागरं गुडैः ॥

मूर्च्छित पारद (कज्जली या रससिन्दूर) ५ तोले तथा काली मिरच, हींग, जीरा, बच और

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोंठका चूर्ण १।-१। तोला लेकर सबको भंगरेके रसमें १ दिन घोट कर १-१ माशेकी गोलियां बना लें।

इन्हें शहदके साथ सेवन करनेसे अग्नि दीप्त होती है।

अनुपान—औषध खानेके पश्चात् अनारदाना, सोंठ और गुड़ का चूर्ण समान भाग मिश्रित १। तोला खाना चाहिये।

(४९४३) भस्मामृतरसः (२)

(रसे. चि. म. । अ. ९)

धान्याभ्रं सूतकं तुल्यं मर्दयेन्मारकद्रवैः।
दिनैकं तिलकल्केन पटं लिप्त्वाथ वर्तिकाम् ॥
कृत्वैव तस्य तैलेन विलिप्य च पुनः पुनः।
प्रज्वाल्य तामधः पात्रे सतैलं पारदं पचेत् ॥
स दिनं भूधरे पक्वो भस्मीभवति नान्यथा।
योजितो रसयोगेशस्तत्तद्रोगहरो भवेत् ॥
मर्दनं तप्तखल्वेऽस्य विशेषादग्निकारकः।
अत्र प्रकरणे वक्ष्ये शुद्धसूतस्य मारिकाः ॥
औषधीर्याः समस्ता वा व्यस्ताऽव्यस्ता दशोत्तराः।
योजिता घ्नन्ति देवेशि सूतं गन्धं विनापि ताः ॥
मेघनादो वज्रवल्ली देवदाली च चित्रकम्।
बला शुण्ठी जयन्ती च कर्कोटी तुम्बिका तथा ॥
कटुतुम्बीकन्दरम्भाकन्दवारणशुण्डिकाः।
कोषातक्यमृताकन्दं कन्यका चक्रमर्दकम् ॥
सूर्यावर्त्तः काकमाची गुञ्जा निर्गुण्डिका तथा।
लाङ्गली सहदेवी च गोक्षुरः काकतुम्बिका ॥
जाती लज्जालुपटुके हंसपादभृङ्गराजकम्।
ब्रह्मबीजं च भूधात्री नागवल्ली वरी तथा ॥
स्नुह्यर्कदुग्धं तुलसी धत्तूरो गिरिकर्णिका।
गोपाली पटुमेताभिर्वज्रमूषागतं पचेत् ॥
ग्रावा दग्धास्तुषा दग्धा दग्धा वल्मीकमृत्तिकाः।
लोहकिट्टं च घस्रार्द्धमाजक्षीरेण मर्दयेत् ॥
नृकेशशणसंयुक्ता वज्रमूषा च तत्कृतिः ॥

धान्याभ्रक और शुद्ध पारा बराबर बराबर लेकर दोनोंको १ दिन मारक औषधियोंके रसमें खरल करें फिर उसमें समान-भाग तिलकी पिट्ठी मिलाकर १ दिन घोटें और उसका स्वच्छ वस्त्रपर लेप करके उसकी बत्ती बनावें। इसको तिलके तेलमें अच्छी तरह तर करके उसके एक सिरेमें आग लगा दें और दूसरे सिरेको चिमटे आदिसे पकड़ कर बत्तीको उलटा लटका दें तथा उसके नीचे चीनी या कांचका पात्र रख दें। इस पात्रमें जो पारदयुक्त तैल इकट्ठा हो जाय उसे मूषामें बन्द करके १ दिन भूधर यन्त्रमें पकावें। इस क्रियासे पारेकी भस्म बन जायगी।

रोगोचित अनुपानके साथ सेवन करानेसे यह समस्त रोगोंको नष्ट करती है।

यदि इसे तप्त खल्वमें मर्दन कर लिया जाय तो इसकी जठराग्निवर्द्धक शक्ति अत्यधिक बढ़ जाती है।

यहां प्रसंगवश पारेकी मारक औषधियों के नाम भी लिखते हैं। इन ओषधियोंके योगसे गन्धकके बिना भी पारेकी भस्म बन जाती है।

कांटे वाली चौलाई, हड़जोड़ी, बिंडाल, चीता, खरैटी, सोंठ, जयन्ती (जैत), ककोड़ा, कड़वी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुम्बी, कड़वी तूंबीकी जड़, केलेका कन्द, हाथीसुंडी, तुरई, गुडूचीकन्द, ग्वारपाठा, पमाड़, हुलहुल, मकोय, गुंजा, संभालु, कलियारी, सहदेवी, गोखरु, काकनासिका, चमेली, लज्जालु, करेला, हंसपदी, भंगरा, ढाकके बीज, भुईआमला, पान, शतावर, थूहरका दूध, आकका दूध, तुलसी, धतूरा, कोयल, गोपाली और सेंधा नमक ।

इन सब या इनमें से दस या ततोधिक ओषधियोंके साथ घोटकर वज्रमूषामें पकानेसे पारेकी भस्म हो जाती है ।

वज्रमूषानिर्माणविधि—चूना, जले हुवे तुष, जली हुई बमींकी मिट्टी और मण्डूर समान भाग लेकर सबको २ पहर तक बकरीके दूधमें खरल करके उसमें कैंचीसे बारीक बारीक कटे हुवे मनुष्यके बाल और सन मिला दें और फिर इस मसालेकी मूषा बनावें । इसे वज्रमूषा कहते हैं ।

(४९४४) भस्मेश्वरचूर्णम्

(भस्मेश्वररसः)

(रसे. सा. सं.; भा. प्र. । ज्वर.; रसे. चि. म. । अ. ९; र. का. धे. । अ. १; र. म. । अ. ६; र. रा. सु. । कफज्वरा.; वृ. यो. त. । त. ५९)

भस्म षोडशनिष्कं स्यादारण्योपलकोद्भवम् ।
निष्कत्रयञ्च मरिचं विषनिष्कञ्च चूर्णयेत् ॥
अयं भस्मेश्वरो नाम सन्निपातनिकृन्तनः ।
पञ्चगुञ्जामितं खादेदार्द्रकस्य रसेन तु ॥

अरने उपलोंकी भस्म १६ भाग, कालीमिर्च का चूर्ण ३ भाग, और शुद्ध बछनागका चूर्ण १ भाग लेकर सबको अच्छी तरह खरल करके रक्खें ।

इसे ५ रत्तीकी मात्रानुसार अदरकके रसके साथ देनेसे सन्निपात ज्वर नष्ट होता है ।

भागोत्तरगुटिका

(भागोत्तरवटकः)

बब्बूलादिगुटिका प्र. सं. ४७३३ देखिये ।

(४९४५) भानुचूडामणिरसः

(रसे. सा. सं. । ज्वर.)

सुवर्णं रससिन्दूरं प्रवालं वङ्गमेव च ।
लोहं ताम्रं तेजपत्रं यमानीं विश्वभेषजम् ॥
सैन्धवं मरिचं कुष्ठं खदिरं द्विहरिद्रकम् ।
रसाञ्जनं माक्षिकञ्च समभागञ्च कारयेत् ॥
वारिणा वटिका कार्या रक्तिद्वयप्रमाणतः ।
भक्षयेत्प्रातरुत्थाय सर्वज्वरकुलान्तकृत् ॥

सुवर्णभस्म, रससिन्दूर, मूंगा भस्म, बंगभस्म, लोहभस्म, ताम्रभस्म तथा तेजपात, अजवायन, सोंठ, सैंधानमक, कालीमिरच, कूठ, खैरसार, हल्दी, दारुहल्दी और रसौतका चूर्ण तथा सोनामक्खी भस्म समान भाग लेकर सबको पानीके साथ घोट कर २–२ रत्तीकी गोलियां बनावें ।

इन्हें प्रातःकाल सेवन करनेसे समस्त प्रकारके ज्वर नष्ट होते हैं ।

(४९४६) भास्करामृताभ्रम्

(भै. र. । अम्लपित्ता.)

वासामृताकेशराजपर्पटीनिम्बभृङ्गकम् ।
मुस्तं हश्वीरबृहती वाट्यालकशतावरी ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एषां सत्त्वैः मलोन्मुक्तैर्मर्दितं विमलाभ्रकम् ।
सहस्रपुटितं तत्र शतावर्या रसं क्षिपेत् ॥
घारद्वादशकं दत्त्वा वटिकां कारयेद्भिषक् ।
भास्करामृतनामेदमम्लपित्तं नियच्छति ॥
शूलमन्नद्रवं शूलं शूलञ्च परिणामजम् ।
छर्दिं हृल्लासमरुचिं तृष्णां कासञ्च दुर्जयम् ॥
हृद्ग्रहं कामलां रक्तपित्तं यक्ष्माणमेव च ।
दाहं शोथं भ्रमिं तन्द्रां विस्फोटं कुष्ठमेव च ॥
श्वासं मूर्च्छाञ्च मन्दाग्निं यकृत्प्लीहोदरं तथा ॥

सहस्रपुटी अभ्रकभस्मको बासा, गिलोय, काला भंगरा, पित्तपापड़ा, नीमकी छाल, सफेद भंगरा, नागरमोथा, सफेद पुनर्नवा, बनभण्टा, खरैटीकी जड़ और शतावरीके स्वरस में १–१ दिन घोटकर अन्तमें शतावरके रसकी १२ भावना देकर (१–१ रत्तीकी) गोलियां बना लें ।

इनके सेवनसे साधारण शूल, अन्नद्रव शूल, परिणाम शूल, छर्दि, जी मिचलाना, अरुचि, तृष्णा, कष्टसाध्य खांसी, हृद्ग्रह, कामला, रक्तपित्त, राजयक्ष्मा, दाह, शोथ, भ्रम, तन्द्रा, विस्फोटक, कुष्ठ, श्वास, मूर्च्छा, मन्दाग्नि, यकृत्, प्लीहा और उदररोग नष्ट होते हैं ।

(४९४७) भास्करो रसः (१)

(र. प्र. सु. । अ. ८)

तालं ताप्यं गन्धकं सूतकं च
शिलाहं वै खेचरं चेत्समं हि ।
चूर्णं कृत्वा चाटरूषेण मर्द्य
सार्द्रेणैवं सौरसाया रसेन ॥
मर्दितं हि तदनु ताम्रनिर्मिते
धारयेच्च सकलं हि सम्पुटे ।
मृत्स्नया च परिवेष्ट्य सम्पुटं
पाचयेच्च सततं हठाग्निना ॥
यामयुग्मभितमेव मात्रया
यन्त्रके हि कुरु शीतलं स्वयम् ।
जायतेऽतिरुचिरो महारसो
पूर्ववद्भवति भास्करोदयः ॥
चित्रकार्द्रकरसेन योजितो
राजयक्ष्मकफवातनाशनः ॥

शुद्ध हरताल, शुद्ध सोनामक्खी, शुद्ध गन्धक, शुद्ध पारा, शुद्ध मनसिल और कसीस समान भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य ओषधियां मिलाकर सबको बासा, अदरक और तुलसीके रसमें एक एक दिन घोटकर गोला बनावें और उसे ताम्रके सम्पुटमें बन्द करके उसपर ४–५ कपड़मिट्टी करके लवणयन्त्र में २ पहर तक तीव्राग्निपर पकावें । जब यन्त्र स्वांग शीतल हो जाय तो सम्पुटमें से औषधको निकालकर पीसकर रक्खें ।

इसे अदरक और चीतेके रसके साथ सेवन करनेसे राजयक्ष्मा, कफ और वायु नष्ट हो जाता है ।

(मात्रा—१–२ रत्ती)

(४९४८) भास्करो रसः (२)

(भै. र. । अग्निमान्द्या.; र. रा. सु. । अजीर्णा.)

विषं सूतं फलं गन्धं त्र्यूषणं टङ्कजीरकम् ।
एकैकं द्विगुणं लौहं शङ्खमभ्रं वराटकम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वतुल्यं लवङ्गञ्च जम्बीरैर्भावयेद्भिषक् ।
सप्तवासरपर्य्यन्तं ततः स्याद्भास्करो रसः ॥
गुञ्जाद्वयप्रमाणेन वटीं कुर्याद्विचक्षणः ।
ताम्बूलीवल्लयोगेन वटीं सञ्चर्व्य भक्षयेत् ॥
शूलरोगेषु सर्वेषु विसूच्यामग्निमान्द्यके ।
सद्यो वह्निकरो ह्येष चन्द्रनाथेन भाषितः ॥

शुद्ध बछनाग विष, शुद्ध पारा, हर्रे, बहेड़ा, आमला, शुद्ध गन्धक, सोंठ, मिर्च, पीपल, सुहागेकी खील और जीरा एक एक भाग तथा लोहभस्म, शंखभस्म, अभ्रकभस्म और कौड़ी भस्म २-२ भाग तथा लौंग इन सबके बराबर लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य ओषधियोंका महीन चूर्ण मिलाकर सबको सात दिन तक जम्बीरी नीबूके रसमें घोटकर २-२ रत्तीकी गोलियां बना लें।

इनमेंसे १-१ गोली पानमें रखकर चबानेसे समस्त प्रकारके शूल, हैजा और अग्निमांद्यादि रोग नष्ट होकर शीघ्र ही अग्नि दीप्त हो जाती है।

(४९४९) भास्वद्वटी

(वै. र. । शूला.)

गरलशुतशुण्ठिभाजाजीवचोषणहिङ्गुभि-
र्विधिविमर्दितैर्भृङ्गद्रावैर्गुटीहरिमन्थवत् ।
हरति विविधं शुक्ताशूलं तथानिलमूढता-
मनलविरतिं सैषा भास्वद्वटी भुवि विश्रुता ॥

शुद्ध बछनाग विष, चीतामूल, सोंठ, जीरा, बच, काली मिरच और भुनी हुई हींग समानभाग लेकर सबका चूर्ण करके उसे १ दिन भंगरेके रसमें घोटकर चनेके बराबर गोलियां बना लें।

इनके सेवनसे पाचन विकारसे उत्पन्न हुवा शूल नष्ट होता है तथा अपान वायु खुल जाता है।

(४९५०) भिषभारसः

(वृ. यो. त. । त. ५९)

रसं गन्धकताम्रं च नागं वङ्गं विषं तथा ॥
जेपालं स्वर्णबीजानि समभागानि कारयेत् ।
आर्द्रके सप्तभाव्यानि सप्तभाव्यानि चित्रके ॥
निर्गुण्ड्यां सप्तभाव्यानि सिद्धोऽयं
भिषभारसः । (?)
गुञ्जामात्रप्रमाणेन वटकान्कारयेत्ततः ॥
वटीमेकां प्रयुञ्जीत शृङ्गवेररसेन तु ।
सर्वज्वरहरा ज्ञेया यामभार्धं तु शाम्यति ॥

शुद्ध पारा, शुद्ध गन्धक, ताम्रभस्म, सीसा-भस्म, बंगभस्म, शुद्ध बछनाग विष, शुद्ध जमाल-गोटा और शुद्ध धतूरेके बीज समान भाग लेकर प्रथम पारे गन्धककी कज्जली बना लें और फिर उसमें अन्य ओषधियोंका महीन चूर्ण मिलाकर सबको अदरक, चीता और संभालूके रसकी ७-७ भावना देकर १-१ रत्तीकी गोलियां बना लें।

इनमेंसे १-१ गोली अदरकके रसके साथ सेवन करने से समस्त ज्वर १ पहरमें ही नष्ट हो जाते हैं।

(४९५१) भीमपराक्रमरसः

(र. र. स. । उ. अ. १७; र. रा. सु. । प्रमेहा.)

तुल्याभ्यां रसगन्धाभ्यां कृत्वा कज्जलिकां
द्व्यहम् ।
द्रावयित्वाऽऽयसे पात्रे मृदुना बदराग्निना ॥
निरुत्थमष्टमांशेन सीसभस्म विनिक्षिपेत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संमिश्र्य कदलीपत्रे निक्षिप्य तदनन्तरम् ॥
आकृष्य परिपिष्टाथ सीसभस्मप्रमाणतः ।
कान्ताभ्रसत्त्वयोर्भस्म राजावर्तकभस्म च ॥
परिशुद्धं च गोमूत्रे शिलाजतु निधाय च ।
खल्वे निक्षिप्य तत्सर्वं यत्नेन परिमर्दयेत् ॥
तुल्यगुञ्जाङ्कुलीबीजचूर्णकल्कोत्थवारिणा ।
कतकाङ्घ्रिकषायेण निम्बपत्ररसेन च ॥
ततः संशोष्य सञ्चूर्ण्य क्षिप्त्वा लोहस्य भाजने ।
त्रिफलानां कषायेण सप्तधा परिभावयेत् ॥
अङ्कुलीबीजबर्बूरनिर्यासौ भृष्टचूर्णितौ ।
समौ रससमौ कृत्वा रसेन सह मर्दयेत् ॥
इति सिद्धरसः सोऽयं भवेद्भीमपराक्रमः ।
नामतः सर्वमेहघ्नो दृष्टप्रत्ययकारकः ॥
वल्लद्वयमितो ग्राह्यो जलैः पर्युषितैः सह ।
पथ्यं मेहोचितं देयं वर्ज्यं सर्वं विवर्जयेत् ॥

शुद्ध पारद और शुद्ध गन्धक समान भाग लेकर दोनोंको तीन दिन तक घोटकर अत्यन्त बारीक कज्जली बनावें ।

तदनन्तर इसे घृत लगे हुवे लोहपात्रमें बेरीकी मन्दाग्निपर पिघलावें और फिर उसमें कज्जलीका आठवां भाग सीसेकी निरुत्थ भस्म मिलाकर उसे गायके गोबर पर फैले हुवे केलेके पत्तेपर डाल दें और उसपर दूसरा पत्ता ढककर उसे गोबर से दबा दें जब वह स्वांग शीतल हो जाय तो पर्पटीको निकालकर पीस लें और उसमें कान्तलोहभस्म, अभ्रकसत्व भस्म, राजावर्तभस्म तथा गोमूत्रमें शुद्ध शिलाजीत; प्रत्येक सीसेकी भस्मके बराबर मिलावें और फिर उसे गुन्जा तथा अंकोलके बीजोंके कल्कके रसमें तथा निर्मलीकी जड़के क्काथ और नीमके पत्तोंके स्वरसमें १-१ दिन घोटकर सुखा लें । तत्पश्चात् सात भावना त्रिफलाके क्वाथकी लोहपात्रमें देकर उसमें उसके बराबर भुने हुवे अंकोल बीज और कीकरके गोंदका समान भाग मिश्रित चूर्ण मिलाकर अच्छी तरह घोटकर रक्खें ।

इसे बासी पानीके साथ ६ रत्तीकी मात्रानुसार सेवन करनेसे समस्त प्रमेह नष्ट होते हैं ।

(४९५२) भीममण्डूरवटकः

(वृ. यो. त. । त. ९५; यो. र.;व. से.; च. द.। परिणामशूला.; वृ. नि. र.; ग. नि. । शूला.; वृ. मा. । परिणामशूला.; र. का. धे. । अ. २१)

यवक्षारः कणा शुण्ठी कोलग्रन्थिकचित्रकात् ॥
प्रत्येकं पलमादाय प्रस्थं लोहस्य किट्टतः ।
शनैः पचेदयः पात्रे यावद्दर्वीप्रलेपनम् ॥
दत्त्वाऽष्टगुणगोमूत्रं किट्टाच्छुद्धाद्विचक्षणैः ।
ततोऽक्षमात्रान्वटकान्योजयेत्सप्तरात्रतः ॥
आदिमध्यावसानेषु भोजनस्योचितस्य वै ।
स भीमवटको शेष परिणामरुगन्तकः ॥

जवाखार, पीपल, सोंठ, बेर, पीपलामूल और चीता ५-५ तोले तथा शुद्ध मण्डूर १ सेर लेकर सबका महीन चूर्ण बनाकर उसमें ८ सेर गोमूत्र मिलाकर लोहेकी कढ़ाईमें पकावें । जब गाढ़ा हो जाय तो १।-१। तोलेके गोले बना लें ।

इनमेंसे १-१ गोला भोजनके आदि, मध्य और अन्तमें ७ दिन तक सेवन करनेसे परिणामशूल नष्ट हो जाता है ।

(व्यवहारिक मात्रा—१॥-२ माशे ।)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(४९५३) **भीमरुद्रोरसः** (१)

(रसे. सा. सं.; र. रा. सु.; र. चं.; भै. र.। विषा.; र. र.; धन्व.। विषा.)

सूतराजस्य तोलैकं गन्धकस्य तथैव च।
अभ्रात्कर्षं ततो देयं तोलैकं कान्तलौहकम् ॥
परोक्तेनौषधेनैव भावयेच्च पृथक् पृथक्।
विशालाबृहतीब्राह्मीसौगन्धिकमुदाडिमैः ॥
मर्कट्याश्चात्मगुप्तायाः स्वरसेन पृथक् पृथक्।
एतद्रक्तिकमानेन वटिकां कारयेद्भिषक् ॥
वटीमेकां भक्षयित्वा पिबेच्छीतजलन्ततः।
भीमरुद्रो रसो नाम चासाध्यमपि साधयेत् ॥
कुक्कुरस्य शृगालस्य विषं हन्ति सुदुस्तरम् ॥

शुद्ध पारा, शुद्ध गन्धक, अभ्रकभस्म और कान्तलोहभस्म समान भाग लेकर सबकी कज्जली बनाकर उसे १-१ दिन इन्द्रायनमूल, बनभण्टा, ब्राह्मी, कमल, अनार, चिरचिटा (अपामार्ग) और कौंचके रसमें घोटकर १-१ रत्तीकी गोलियां बना लें।

इनमेंसे नित्य प्रति १-१ गोली शीतल जलके साथ सेवन करानेसे पागल कुत्ते और गीदड़का विष नष्ट हो जाता है।

(४९५४) **भीमरुद्रो रसः** (२)

(भै. र.। विषा.)

मनः शिलालमरिचैर्दारुणा दरदेन च।
अपामार्गस्य हेम्नश्च हयमारशिरीषयोः ॥
मूले रुद्राक्षतोयेन विष्णुकान्ताम्बुना ततः।
शतधा भावितैः कुर्याद् वटिका मुद्गसम्मिताः॥
व्यालदष्टं पीतविषं निरिन्द्रियमचेतनम्।
पुनः सञ्जीवयेदेष भीमरुद्राभिधो रसः॥

शुद्ध मनसिल, शुद्ध हरताल, काली मिरच, शुद्ध संखिया, शुद्ध हिंगुल, अपामार्ग (चिरचिटे) की जड़, धतूरेकी जड़, कनेरकी जड़ और सिरसकी जड़का चूर्ण समान भाग लेकर सबको एकत्र घोटकर उसे रुद्राक्ष और कोयलके रसकी १००-१०० भावना देकर मूंगके बराबर गोलियां बना लें।

सांपके काटे हुवे मनुष्यको, और जिसने विष पी लिया है उसे यदि बेहोशी हो गई हो और इन्द्रियां अपना काम न करती हों तो ये गोलियां खिलानेसे विष नष्ट होता और पुनः चेतना आ जाती है।

(४९५५) **भुक्तद्रावीरसः**

(यो. र.। अजीर्णा.)

द्वौ क्षारौ टङ्कणं सूतं लवङ्गं लवणत्रयम्।
पिप्पली गन्धकं शुण्ठी मरीचं पलसम्मितम् ॥
कर्षमेकं विषं दत्त्वा सूक्ष्मचूर्णानि कारयेत्।
अर्कदुग्धस्य दातव्या भावना सप्तवासरम् ॥
अन्तर्धूमं गजपुटे पक्त्वा शीतं समुद्धरेत्।
ततो लवङ्गमरिचस्फटिकीनां पलं पलम् ॥
सर्वं सम्मर्द्य दृढवद् दृढभाण्डे निधापयेत्।
सायं गुञ्जाद्वयं खादेद्भुक्तं द्रावयति क्षणात् ॥
पुनर्भोजनवाञ्छां च जनयेत्प्रहरोपरि ॥

जवाखार, सज्जीखार, सुहागा, शुद्ध पारद, लौंग, सेंधा नमक, काला नमक, सांभर, पीपल, शुद्ध गन्धक, सोंठ और कालीमिर्च ५-५ तोले और शुद्ध बछनाग विष १। तोला लेकर प्रथम पारे गन्धक की कज्जली बनावें और फिर उसमें

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्य ओषधियोंका चूर्ण मिलाकर उसे सात दिन तक आकके दूधमें घोटें और फिर शरावसम्पुटमें बन्द करके गजपुटमें फूंक दें । जब वह स्वांग शीतल हो जाय तो औषधको निकालकर पीस कर उसमें ५-५ तोले लौंग, काली मिर्च और फटकीका चूर्ण मिलाकर अच्छी तरह घोटकर रक्खें ।

इसमेंसे २ रत्ती औषध सायङ्कालके समय खानेसे भोजन तुरन्त पच जाता है और १ पहर बाद फिर भोजनकी इच्छा हो जाती है ।

(४९५६) भुक्तोत्तरीयावटी

(र. रा. सु. । अजीर्णा.)

लगभग भक्तविपाकवटी सं. ४९३५ के समान ही है । केवल इतना अन्तर है कि इसमें हरिताल और अभ्रकके स्थानमें ताम्रभस्म पड़ती है तथा भावना द्रव्योंमें तुलसीकी जगह ज्योतिष्मती लिखी है और गुणोंमें निम्न लिखित श्लोक अधिक लिखे हैं:-

भक्षयेत्तां वटीं भार्यो लवङ्गेन नियोजिताम् ॥
भक्तोत्तरीये बहुभोजने वा
आमानुबन्धीं चिरमन्दवह्नौ ।
विट्सङ्ग्रहे वातकफानुबन्धे
शोथोदरे मेहगदेप्यजीर्णे ॥
शूले त्रिदोषे प्रभवे ज्वरे च
सम्यक् वटीं भुक्तविपाकसंज्ञा ।
सुखं विपच्याशु नरस्य कोष्ठं
मुहुर्मुहुर्वाञ्छति भोजनं च ॥

अर्थात् इनमें से १-१ गोली लौंगके चूर्णके साथ सेवन करनेसे अधिक किया हुवा भोजन भी शीघ्र ही पच जाता है और बार बार भूख लगती है ।

इनके सेवनसे आमविकार, पुरानी मन्दाग्नि, कब्ज, वातकफज शोथोदर, प्रमेह, अजीर्ण, शूल और सन्निपात ज्वर नष्ट होता है ।

(४९५७) भूतनाथभैरवरसः

(र. का. धे. । अ. १)

आकाशवल्लीरसतो रसं घोटा विभावयेत् ।
बृहतीफलजैर्द्रावैस्तालो मुनिविभावितः ॥
षड्भागप्रमितं सौम्यं धूर्तात्पञ्चदशद्रवैः ।
चतुरंशाष्टङ्कणस्य शिवाक्षेण विभावनाः ॥
षट्जैपालाहिफेनांशा लवङ्गमरिचानि च ।
शिवनेत्रपुटैस्त्रेधा वचा ब्राह्मी च वाकुची ॥
त्र्यंशा भृङ्गराजस्य ददेद् द्वादश भावनाः ।
निम्बकाष्ठेन घृष्टोऽयं भूतनाथादिभैरवः ॥
तत्तद्रोगानुपानेन सर्वज्वरहरो मतः ॥

(१) १ भाग पारेको ६ रोज तक अकास बेलके रसमें घोटें ।

(२) १ भाग हरतालको बनभण्टेके फलोंके रसमें घोटें ।

(३) ६ भाग संखियेको १५ दिन धतूरेके रसमें घोटें ।

(४) ४ भाग सुहागेको रुद्राक्षके रसमें घोट लें ।

(५) जमाल गोटा और अफीम ६-६ भाग तथा लौंग और काली मिर्चका चूर्ण ३-३ भाग लेकर सबको एकत्र मिलाकर उसे बच, ब्राह्मी और बाबचीके रसकी ३-३ भावना दें ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्तमें उपरोक्त पांचों योगोंको एकत्र मिला-कर उसे १२ भावना भंगरेके रसकी नीमके सोटेसे घोटकर दें।

इसे यथोचित अनुपानके साथ सेवन करानेसे समस्त ज्वर नष्ट होते हैं।

(मात्रा—आधी रत्ती।)

नोट—इस प्रयोग में ५ वां भाग संखिया पड़ता है अत एव अत्यन्त सावधानी पूर्वक सेवन कराना चाहिये।

(४९५८) भूतभैरव चूर्णम् [1]

(ज्वराङ्कुशरसः, तालाङ्को रसः)

(र. चं. । ज्वर.; भा. प्र. । म. खं. ज्वरा.; वै. र. । ज्वरा.; वृ. नि. र. । जीर्णज्वरा.; र. रा. सु.; भै. र. । ज्वरा.)

तालकं शुक्तिकाचूर्णं तुल्यं तत्रोभयोरपि ।
नवमांशं तु तुत्थं स्यान्मर्दयेत्कन्यकाद्रवैः ॥
तत्तु संशुष्कमुपलैर्वन्यैर्गजपुटे पचेत् ।
शीतं तत् पेषयेच्चूर्णं गुञ्जामात्रं सितायुतम् ॥
प्रभाते भक्षयेत्तेन याति शीतज्वरक्षयम् ।
वान्तिर्भवति कस्यापि कस्यापि न भवत्यपि ॥
एकेन दिवसेनैव शीतज्वरहरं परम् ।
मध्याह्नसमये पथ्यं भक्तं शिखरिणी तथा ॥

[1] १—इस रसके द्रव्योंका परिमाण भिन्न भिन्न ग्रन्थोंमें भिन्न भिन्न है। वै. र. और वृ. नि. र. में हरताल १ भाग, नीला थोथा २ भाग और शुक्तिभस्म ९ भाग लिखी है तथा धतूरेके रसकी भावना देकर गोलियां बनानेके लिये लिखा है। भैषज्यरत्नावलीमें हरताल २ भाग, नीलाथोथा १ भाग और शुक्तिभस्म ४ भाग लिखी है।

शुद्ध हरताल और मोतीकी सीप ९–९ तोले तथा शुद्ध नीला थोथा (तुत्थ) २ तोले लेकर सबको १ दिन घीकुमार (ग्वार पाठा) के रसमें घोटकर सुखाकर शरावसम्पुटमें बन्द करके गज-पुटमें फूंक दें। जब पुट स्वांगशीतल हो जाय तो औषधको निकाल कर पीस लें।

इसमें से प्रातःकाल १ रत्ती दवा मिश्रीके साथ खिलानेसे शीत ज्वर १ ही दिनमें जाता रहता है।

इससे किसी किसीको वमन हो जाती है और किसीको नहीं भी होती।

पथ्य—दोपहरको भात तथा शिखरन खानी चाहिये।

(४९५९) भूतभैरवरसः (१)

(र. चं.; र. सा. सं.; र. रा. सु. । कुष्ठा.; रसे. चि. म. । अ. ९; र. चि. म. । स्त. २; र. का. धे. । कुष्ठा. ४०.)

शुद्धं पंचदशात्र तालकमितं शुद्धं च षट् गन्धकः ।
सप्ताष्टौ नव तिन्तिडीयकफलात्काठिल्लकानां दश ॥
सेहुण्डार्कपयोभिरेव सततं सञ्चूर्ण्य तद्भावयेत् ।
रोहीतस्य जटारसेन मृदितं श्लक्ष्णं ततः खल्लितम् ॥
एकीकृत्य समस्तमेतदपि तट्टङ्कैकमेतज्जयेत् ।
पश्चाद्द्रासविशुद्धवारिसहितं किञ्चिच्च तत्पीयते ॥
ताम्बूलं शशिखण्डमण्डितवटीमिश्रं ततः स्वापयेत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सन्ध्यायां मृगलोचनापरिवृतौ कर्माणि सम्पादयेत् ॥
देहं वीक्ष्य सुखं सुखं न विरसं विज्ञाय सम्यक् सुधीः ।
छागीदुग्धमिहापि तं ननु दिनं सुप्तं च तत्पाययेत् ॥
नित्यं नित्यमिदं करोति नियतं सर्वौषधैर्वर्जितम् ।
साम्यग्रायसमग्रमग्रिमतरं नीलं च पीतारुणम् ॥
श्वेतं स्फीतमनल्पकं भृशमति प्रायः क्रिमिव्याकुलम् ।
गन्धालिप्रमितं खटीकसदृशं कुष्ठं च चोत्सादनम् ॥
अष्टाष्टादशभूतभैरव इति ख्यातः क्षितौ हन्ति च ।
वातव्याधिनिकृन्तनः कफकृतान् कुष्ठान्विशेषानयम् ॥
हन्तीति ज्वरमुग्ररूपमधिकं दाहाभिधानामयम् ।
कुर्याद्रूपमनश्वरं गुणभृद् भृंगास्पदं विग्रहम् ॥
एवं समासात्कुरुते समानं पथ्यं च तथ्यं सकलं करोति ।
भुञ्जीत भक्तं सततं मधुक्तं घृतं शृतं वा विकृतं तदेव ॥
स्वच्छन्ददुग्धेन सुखेन जग्धं पथ्यं तदेतत्प्रवदन्ति सन्तः ।
कुष्ठं तु दुष्टं च निराकरोति गात्रं च कुर्याच्छुभगन्धयुक्तम् ॥

शुद्ध हरताल १५ भाग, शुद्ध गन्धक ६ भाग नवीन इमली ७ या ८ भाग और करेला १० भाग लेकर सबको एकत्र खरल करके सेहुण्ड (थूहर—सेंड) और आकके दूध तथा रुहेड़ेकी जड़के काथ की १—१ भावना देकर १—१ टङ्कको गोलियां बना लें ।

इनमें से १ गोली खाकर ऊपरसे थोड़ा स्वच्छ शीतल जल पीना चाहिये और उसके पश्चात् कपूर युक्त पान खाकर सो रहना चाहिये । उठने पर यदि शरीर स्वस्थ हो और मुख विरस न हो तो बकरीका दूध पीना चाहिये ।

इसी प्रकार नित्य प्रति कुछ दिनों तक यह औषध सेवन का जाय तो नीला, पीला, लाल, सफेद, अत्यन्त, प्रवृद्ध और कृमियों से परिपूर्ण आदि समस्त प्रकारके कुष्ठ नष्ट हो जाते हैं ।

यह रस समस्त वातव्याधियों को और विशेषतः कफज कुष्ठोंको नष्ट करता है ।

इसके अतिरिक्त यह भयङ्कर सन्ताप युक्त ज्वरको भी नष्ट करता है ।

इसके सेवनसे समस्त कुष्ठ नष्ट होकर शरीर अत्यन्त स्वरूपवान हो जाता है ।

पथ्य—घृत, भात और दूध अथवा केवल दूध ।

भूतभैरवरसः (२)

(र. का. धे. । अपस्मारा. ५; धन्व. । अपस्मारा. भा. प्र. म. खं.; र. रा. सु.; रसे. सा. सं.; र. र.; यो. र. । अपस्मारा.; वृ. यो. त. । त. ८८; वृ. नि. र. । उन्मादा.; यो. त. । त. ३९)

चण्डभैरवरस प्रयोग संख्या १८७२ देखिये । कुछ ग्रन्थोंमें तो इस मृतभैरवका पाठ बिलकुल उसके समान ही है और कुछ में रसाञ्जनके स्थान में स्रोतोऽञ्जन और गोमूत्रके स्थानमें मनुष्यका मूत्र लिखा है तथा सेवन—विधि इस प्रकार लिखी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

है:-इसमें से १ माशा रस घीके साथ खिलाकर ऊपरसे सोंठ, मिर्च, पीपल, हींग, घी, मनुष्यका मूत्र और काला नमक मिलाकर पिलावें । इसे भूतो न्मादमें धतूरेके ५ नग बीजोंको घीमें मिलाकर उसके साथ खिलाना चाहिये ।

(४९६०) भूताङ्कुशरसः (१)

(र. र.; र. रा. सु.[१] । कासा.; यो. चि. म. । अ. ७; र. र. स. । उ. अ. १३; र. का. धे.[२] । कासा.)

शुद्धसूतस्य भागैकं द्वि भागं शुद्धगन्धकम् ।
भागद्वयं मृतं ताम्रं मरिचं दशभागकम् ॥
मृताभ्रस्य चतुर्भागं भागमेकं विषं क्षिपेत् ।
भूताङ्कुशस्य भागैकं सर्वमम्लेन भावयेत् ॥
सोयं भूताङ्कुशो नाम यामैकं वातकासजित् ।
अनुपानं लिहेत्क्षौद्रैर्विभीतकफलत्वचम् ॥

शुद्ध पारा १ भाग, शुद्ध गन्धक २ भाग, ताम्रभस्म २ भाग, काली मिर्चका चूर्ण १० भाग, अभ्रकभस्म ४ भाग. और शुद्ध बच्छनाग तथा धतूरेके बीजोंका चूर्ण १-१ भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य औषधोंका चूर्ण मिलाकर सबको नीबूके रसमें घोटकर १-१ रत्ती की गोलियां बना लें ।

इनमेंसे ३-४ गोली खाकर ऊपरसे बहेड़ेकी छालका चूर्ण शहदमें मिलाकर चाटनेसे वातज खांसी १ पहरमें ही नष्ट हो जाती है ।

१—र. रा. सु. और र. र. स. में गंधक १ भाग, ताम्रभस्म ३ भाग और कालीमिर्च ५ भाग लिखी है ।

२—रसकामधेनुमें गन्धक १ भाग और ताम्र ३ भाग लिखा है ।

(४९६१) भूताङ्कुशरसः (२)

(र. र.; र. सा. सं.; र. रा. सु.; भै. र.;[१] र. च.; धन्व. । उन्मादा.)

सूतायस्ताम्रमभ्रञ्च मुक्तां चापि समं समम् ।
सूतपादोत्तमं वज्रं शिलागन्धकतालकम् ॥
तुत्थं रसाञ्जनं शुद्धमब्धिफेनं शिलाञ्जनम् ।
पञ्चानां लवणानाञ्च प्रतिभागं रसोन्मितम् ॥
भृङ्गराजचित्रकक्षीरीदुग्धेनापि विमर्दयेत् ।
दिनान्ते पिण्डिकां कृत्वा रुद्ध्वा गजपुटे पचेत् ॥
भूताङ्कुशो रसो नाम नित्यं गुञ्जाद्वयं लिहेत् ।
आर्द्रकस्य रसेनापि भूतोन्मादनिवारणम् ॥
पिप्पल्यार्क्कं पिबेच्चानु दशमूलकषायकम् ।
स्वेदयेत्कटुतुम्ब्या च तीक्ष्णं रूक्षञ्च वर्जयेत् ॥
माहिषञ्च घृतं क्षीरं गुर्वन्नमपि भक्षयेत् ।
अभ्यङ्गः कटुतैलेन हितो भूताङ्कुशे रसे ॥

शुद्ध पारद, लोहभस्म, ताम्रभस्म, अभ्रकभस्म और मोतीभस्म १-१ तोला, हीराभस्म ३ माशे और शुद्ध मनसिल, शुद्ध गन्धक, शुद्ध हरताल, शुद्ध तूतिया, रसौत, समुद्रझाग, काला सुरमा, सेंधानमक, सञ्चल (काला नमक), बिडलवण, समुद्र नमक, और सांभरनमक १-१ तोला लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य ओषधियोंका महीन चूर्ण मिलाकर सबको १-१ दिन भंगरेके रस, चीतेके काथ और थूहर (सेंड-सेहुंड) के दूधमें घोटकर गोला बनावें और उसे शरावसम्पुटमें बन्द करके गजपुटमें फूंक दें । जब स्वांग शीतल हो जाय तो औषधको निकालकर पीसलें ।

१—भै. र. में, अभ्रकके स्थानमें चांदी भस्म लिखी है ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इसमेंसे २ रत्ती औषध अदरकके रसके साथ चटाकर ऊपरसे पीपलका चूर्ण मिलाकर दशमूलका क्वाथ पिलानेसे उन्मादरोग नष्ट हो जाता है।

इस रसके सेवनकालमें रोगीको कड़वी तूंबीके क्वाथकी भाप देनी चाहिये।

पथ्य––भैंसका घी और दूध तथा भारी पदार्थ खाने चाहियें और शरीरपर सरसोंके तैलकी मालिश करनी चाहिये।

अपथ्य––तीक्ष्ण और रूक्ष पदार्थोंका त्याग करना चाहिये।

(४९६२) भूदारो रसः

(र. र. । शूला)

शुद्धसूतं समं गन्धं मृताकोरो मनःशिला।
सैन्धवं माक्षिकं तालं धत्तूरं हिङ्गु सूरणम्॥
महाराष्ट्रयर्कनिर्गुण्डीवासैरण्डद्रवैर्दिनम्।
मर्द्यं रुद्ध्वा पुटे पच्यात् कुक्कुटाख्ये समुद्धरेत्॥
अष्टगुञ्जां लिहेत्क्षौद्रैर्भूदारो वातशूलजित्।
हिङ्गु सौवर्चलं शुण्ठीमक्षमुष्णाम्बुनाप्यनु॥

शुद्ध पारा, शुद्ध गन्धक, ताम्रभस्म, मुण्डलोहभस्म, शुद्ध मनसिल, सेंधा नमक, स्वर्णमाक्षिक भस्म, शुद्ध हरताल, धतूरेके शुद्ध बीज, भुनी हुई हींग और जिमींकन्द समान भाग लेकर प्रथम पारे गन्धककी कज्जली बनावें और फिर उसमें अन्य ओषधियोंका महीन चूर्ण मिलाकर सबको १–१ दिन जलपीपल, आक, संभालु, वासा और अरण्ड के रसमें घोटकर गोला बनावें और उसे शरावसम्पुट में बन्द करके कुक्कुटपुटमें फूंक दें एवं उसके स्वांगशीतल होनेपर औषधको निकालकर पीसकर सुरक्षित रक्खें।

इसमें से १ माशा औषध शहदके साथ चाटकर ऊपरसे हींग, सञ्चल (काला नमक), सोंठ और बहेड़ाका चूर्ण गर्म पानीके साथ पीनेसे वातज शूल नष्ट होता है।

(४९६३) भूनिम्बादिगुटी

(वृ. नि. र. । पाण्डु.)

भूनिम्बाब्दपटोलनिम्बकटुकादार्वीविडङ्गामृता–
वासाक्षामलकाभयामरकणाविश्वौषधैश्चूर्णितैः।
तुल्यैः पर्पटचूर्णितैः सदहनैः सल्लोहचूर्णार्द्रकैः
कर्तव्या मधुसंयुता च गुटिका पाण्डवामयप्राहरा॥

चिरायता, नागरमोथा, पटोल (परवल), नीमकी छाल, कुटकी, दारुहल्दी, बायबिडंग, गिलोय, वासा, बहेड़ा, आमला, हर्र, देवदारु, पीपल सोंठ, पित्तपापड़ा, और चीतेकी जड़का, चूर्ण तथा लोहभस्म समान भाग लेकर सबको अदरकके रसमें घोटकर (२–२ माशेकी) गोलियां बना लें।

इन्हें शहदके साथ सेवन करनेसे पाण्डुरोग नष्ट होता है।

(४९६४) भेकराजरसादिमोदकः

(वै. म. र. । पटल ९)

भेकराजरसैः सुभावितलोहयुक्तवरारज–
स्तुल्यभागवटच्छदोद्भवभस्म चाप्यभया पुनः॥
षट्पदोत्थरसेन पेषितमक्षमात्रविनिर्मितम्।
पिण्डमस्यति पाण्डुरोगमुदश्विता सह सेवितम्॥

लोहभस्म और त्रिफलेका चूर्ण समान भाग लेकर दोनोंको भंगरेके रसमें घोटकर उसमें दोनोंके बराबर बड़के पत्तोंकी भस्म और उतना ही हर्रका चूर्ण मिलाकर पुनः भंगरेके रसमें घोटकर १।–१। तोलेके गोले बनावें।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इन्हें उदश्वित (दहीमें बराबर भाग पानी मिलाकर बनाये हुवे तक्र) के साथ सेवन करनेसे पाण्डुरोग नष्ट होता है ।

(व्यवहारिक मात्रा ३—४ माशे)

भैरवनाथी पञ्चामृतपर्पटी

(र. रा. सु.; र. र. स.)

पञ्चामृतपर्पटी प्रयोग संख्या ४२८२ देखिये ।

(४९६५) **भैरवरसः** (१)

(भै. र. । उपदंश.)

शुद्धसूतं ग्रहीतव्यं दशगुञ्जकमात्रकम् ।
त्रिगुणां शर्करां लौहे निम्बदण्डेन मर्दयेत् ॥
याममात्रं तत्र दद्याच्छ्वेतं खदिरचूर्णकम् ।
सूततुल्यं ततः कुर्यान्मर्दनात् कज्जलोपमम् ॥
विंशतिर्वटिकाः कार्याः स्थाप्याः गोधूमचूर्णके ।
निःशेषं निःसृता ज्ञात्वा पिडकास्ताः कलेवरे ॥
भैरवं देवमभ्यर्च्य बलिं तस्मै प्रदाय च ।
विधाय योगिनीपूजां दुर्गामभ्यर्च्य यत्नतः ॥
वटिकास्ताः प्रयोक्तव्या भिषजा जानता क्रियाम् ।
दिवसत्रितयं दद्यात्तिस्रस्तिस्रो विजानता ॥
चतुर्थाहात्समारभ्य एकामेकां प्रयोजयेत् ।
एवं चतुर्दशदिनैर्नीरोगो जायते नरः ॥
पथ्यं शर्करया सार्द्धमुष्णान्नं घृतगन्धि च ।
कुर्यात्साकांक्षमुत्थानं सकृद्भोजनमिष्यते ॥
जलपानं जलस्पर्शं न कदा च न कारयेत् ।
दुःसहायान्तु तृष्णायामिक्षुदाडिमकादिकम् ॥
शौचकार्येऽप्युष्णवारि वाससा प्रोञ्छनं द्रुतम् ।
वातातपाग्निसम्पर्कं दूरतः परिवर्जयेत् ॥
मेघागमे वा शीते वा कार्यमेतद्विजानता ।
मुखरोगे तु संजाते मुखरोगहरी क्रिया ॥
श्रमाध्वभाराध्ययनस्वप्नानस्नाद्विवर्जयेत् ।
ताम्बूलं भक्षयेन्नित्यं कर्पूरादिसुवासितम् ॥
क्रिया श्लेष्महरी युक्ता वातपित्ताविरोधिनी ।
लवणं वर्जयेदम्लं दिवानिद्रां तथैव च ॥
रात्रौ जागरणञ्चैव स्त्रीमुखालोकनं तथा ।
सप्ताहद्वयमुत्क्रम्य स्नानमुष्णाम्बुना चरेत् ॥
व्यायामाद्यं वर्जनीयं यावच्च प्रकृतिर्भवेत् ।
एवं कृतविधानस्तु यः करोत्येतदौषधम् ॥
स एव पापरोगस्य पारं याति जितेन्द्रियः ।
पिडका विलयं यान्ति बलं तेजश्च वर्द्धते ॥
रुजा च प्रशमं याति ग्रन्थिशोथश्च शाम्यति ।
अस्थ्नां भवति दार्ढ्यञ्च आमवातश्च शाम्यति ॥
भैरवेण समाख्यातो रसोऽयं भैरवः स्वयम् ॥

शुद्ध पारा १० रत्ती और खांड ३० रत्ती; इन्हें एकत्र लोहपात्र में नीम के डण्डे से १ प्रहर घोटें । जब पारद के कण न दिखाई दें तब उसमें १० रत्ती श्वेत कत्थे का चूर्ण मिलाकर मर्दन करें । मर्दन करते २ जब कज्जल के समान होजाय तब उस सबकी बीस गोली बनावें । इन गोलियों को गेहूं के आटे में रखदें । जब यह देखें कि उपदंशज विष के कारण शरीर पर सम्पूर्ण पिडकायें निकल आई हैं तब भैरव की पूजा करें तथा बलि दें । इसी प्रकार योगिनी तथा दुर्गाकी पूजा करके तत्काल इन गोलियों का यथाविधि प्रयोग करावें । प्रथम तीन दिन तक प्रतिदिन तीन तीन गोलियां सेवन करावें । चौथे दिन से प्रतिदिन एक २ गोली खिलावें । इस प्रकार १४ दिन करने से मनुष्य नीरोग हो जाता है । पथ्य—खांड तथा अल्प घृतयुक्त उष्ण अन्न । यह भोजन भी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

